इतश्चोज्ज**यिन्यां** श्री**विक्रमादित्य**स्या**वन्ति**नरेशितुः सदसि कश्चिन्नैमित्तिकः **सातवाहनं प्रतिष्ठानपत्तने** भाविनं नरेन्द्रमादिक्षत् । अथैतस्यामेव पुर्यामेकः स्थविरविप्रः स्वायुरवसानमवसाय चतुरः स्वतनयानाहूय प्रोक्तवान् । यथा–वत्स ! मयि [6]परेयुषि मदीयशय्योच्छीर्षकदक्षिणपदादारभ्य चतुर्णामपि पादानामधो वर्तमानं निधिकलशचतुष्टयं युष्माभिर्यथाज्येष्ठं विभज्य ग्राह्यम्, येन भवतां निर्वाहः संपनीपद्यते । पुत्रैस्तु तथेत्यादेशः स्वीचक्रे 20 पितुः । तस्मिन्नुपरते तस्यौर्ध्वदेहिकं कृत्वा त्रयोदशेऽहनि भुवं खात्वा यथायथं चतुरोऽपि निधिकलशांस्ते जगृहिरे । यावदुद्घाट्य निभालयन्ति तावत्प्रथमस्य कुम्भे कनकम्, द्वैतीयकस्य कृष्णमृत्स्ना, तृतीयस्य बुशम्, तुरीयस्य चास्थीनि ददृशिरे । तदनु ज्यायसा साकं इतरे त्रयोऽपि विवदन्ते स्म–यदस्मभ्यमपि विभज्य कनकं वितरेति । तस्मिंश्चावितरति सति ते**ऽवन्तिपते**र्धर्माधिकरणमुपास्थिषत । तत्रापि न तेषां वादनिर्णयः समपादि । ततश्चत्वारोऽपि ते **महाराष्ट्र**जनपद[7]मुपानंसिषुः । **सातवाहन**कुमारस्तु कुलालमृदा हस्त्यश्वरथसुभटानन्वहं नवनवान् विदधानः कुलालशालायां 25 बालक्रीडादुर्ललितः कलितस्थितिरनयत् समयम् । ते च द्विजतनुजाः प्रतिष्ठानपत्तनमुपेत्य परितस्तस्यामेव चक्रजीवनशालायां तस्थिवांसः । **सातवाहन**कुमारस्तु तानवेक्ष्येङ्गिताकारकुशलः प्रोवाच–भो विप्राः ! किं भवन्तो [8]वीक्षापन्ना इव वीक्ष्यन्ते । तैस्तु जगदे–जगदेकसुभग ! कथमिव वयं चिन्ताचान्तचेतसस्त्वयाऽज्ञासिष्महि । कुमारेण बभणे–इङ्गितैः किमिव नावगम्यते ! । तैरुक्तम्–युक्तमेतत्; परं भवतः पुरो निवेदितेन चिन्ताहेतुना [9]किं स्याद् ? । बालः खलु भवान् । बाल आलपद्–यदि परं जातु मत्तोऽपि साध्यं वः सिध्यति । तन्निवेद्यतां स चिन्ताहेतुः । ततस्ते तद्व- 30 चनवैचित्रीहृतहृदयाः सकलमपि स्वस्वरूपं निधिनिरयणादि **मालवे**शपरिषद्यपि विवादानिर्णयान्तं तस्मै निवेदितवन्तः । कुमारस्तु स्मितविच्छुरिताधरोऽवादीत्–भो विप्राः ! अहं यौष्माकं झगटकं निर्णयामि, श्रूयतामवहितैः । यस्य तावद्वप्त्रा कनककलशं प्रददे स तेनैव निर्वृतोऽस्तु । यस्य कलशे कृष्णमृत्स्ना निरगात्स क्षेत्रकेदारादीन् गृह्णातु । यस्य तु बुशं स

---

1 B प्रापुकः । 0 एतदन्तर्गता पंक्तिः पतिता C आदर्शे । 2 B नास्त्येतत्पदम् । 3 B समागम्य । 4 C पीडिततया । 5 B लक्ष्यते । 6 B Pa पुरेयुषि । 7 Pa °पदे । 8 B Pa वीक्ष्यापन्ना । 9 B विना हेतुना ।

कोष्ठागारगतधान्यानि सर्वाण्यपि स्वीकुरुताम् । यस्य चास्थीनि निरगुः सोऽश्वगोमहिषीवृषभदासीदासादिकमुपादत्तामिति युष्मज्जनकस्याशयः । इति क्षीरकण्ठोक्तं श्रुत्वा सूत्रकण्ठाश्छिन्नविवादास्तद्वचनं प्रतिश्रुत्य तमनुज्ञाप्य प्रत्याययुः स्वनगरीम् । प्रथिता सा तद्विवादनिर्णयकथा पुर्याम् । राज्ञाप्याकार्य पर्यनुयुक्ताः—किं नु भो ! भवतां वादनिर्णयो जातः ? । तैरुक्तम्— आम स्वामिन् ! । केन निर्णीतः ?—इति नृपेणोदिते **सातवाहन**स्वरूपं सर्वमवितथमचकथन् । तदाकर्ण्य,
5 तस्य शिशोरपि बुद्धिवैभवं विभाव्य, प्रागुक्तं दैवज्ञेन तस्य **प्रतिष्ठाने** राज्यं भविष्यदनुस्मृत्य, तं स्वप्रतिपन्थिनमाकलय्य क्षुभितमनास्तन्मारणौपयिकमचिन्तयच्चिरं नरेश्वरः । अभिमरादिप्रयोगैर्मारिते चास्मिन्नयशः-क्षात्रवृत्तिक्षती भवेतामिति विचार्य सन्नद्धचतुरङ्गचमूसमूहोऽवन्तिपतिः प्रस्थाय **प्रतिष्ठानपत्तनं** यथेष्टमवेष्टयत् । तदवलोक्य ते ग्राम्यास्त्रस्ताश्चिन्तयन्ति स्म । कस्योपर्ययमेतावानाटोपः सकोपस्य **मालवेश**स्य ? । न तावदत्र राजा राजन्यो वा वीरस्तादृग्दुर्गादि वेति चिन्तयत्सु तेषु **मालवेश**प्रहितो दूतः समेत्य **सातवाहन**मवोचत्—भो कुमारक ! तुभ्यं नृपः क्रुद्धः प्रातस्त्वां मार-
10 यिष्यत्यतो युद्धाद्युपायचिन्तनावहितेन भवता भाव्यमिति । स च श्रुत्वापि दूतोक्तीर्निर्भयं निर्भरं[1] क्रीडन्नेवास्ते । अत्रान्तरे विदितपरमार्थौ तौ तन्मातुलावितरेतरं प्रति विगतदुर्विकल्पौ पुनः **प्रतिष्ठान**मागतौ परचक्रं दृष्ट्वा भगिनीं प्रोचतुः—हे स्वसर्येन दिवौकसा तवायं तनयो दत्तस्तमेव स्मर, यथा स एवास्य साहायकं विधत्ते । सापि तद्वचसा प्राचीनं नागपतेर्वचः स्मृत्वा शिरसि निवेशितघटा गोदावर्यां नागह्रदं गत्वा, स्नात्वा च, तमेव नागनायकमाराधयत् । तत्क्षणान्नागराजः प्रत्यक्षीभूय वाचमुवाच ब्राह्मणीं—को हेतुरहमनुस्मृतस्त्वया ? । तया च प्रणम्य यथास्थितमभिहिते, बभाषे
15 शेषराजः—मयि प्रतपति कस्तव तनयमभिभवितुं क्षमः ? इत्युदीर्य तद् घटमादाय ह्रदान्तर्निमज्य पीयूषकुण्डात् सुधया घटं प्रपूर्यानीय च तस्यै दत्तवान् । गदितवांश्च—अनेनामृतेन **सातवाहन**कृतमृन्मयाश्वरथगजपदातिजातमभिषिञ्चेः, यथा तत्सजीवं भूत्वा परबलं भनक्ति । त्वत्पुत्रं च **प्रतिष्ठान**पत्तनराज्ये अयमेव पीयूषघटोऽभिषेक्ष्यति । प्रस्तावे पुनः स्मरणीयोऽहम्—इत्युक्त्वा स्वास्पदमगमद्भुजङ्गपुङ्गवः । सापि सुधाघटमादाय स्वसद्मोपेत्य, तेन तन्मृन्मयं[2] सैन्यमदैन्यमभ्युक्षामास । प्रातर्दिव्यानुभावतस्सचेतनीभूय तत्सैन्यं सम्मुखं गत्वा युयुधे परानीकिन्या सार्द्धम् । तया **सातवाहन**-
20 पृतनया भग्नमवन्तीशितुर्बलम् । **विक्रमनृपति**रपि पलाय्य ययाववन्तीम् । तदनु **सातवाहनो** राज्येऽभिषिक्तः । **प्रतिष्ठानं** च पुनर्निजविभूतिपरिभूतवस्वोकसाराभिमानं धवलगृहदेवगृहहट्टपंक्तिराजपथप्राकारपरिखादिभिः सुनिविष्टमजनिष्ट पत्तनम् । **सातवाहनो**ऽपि क्रमेण **दक्षिणापथ**मनृणं विधाय **तापी**तीरपर्यन्तं चो**त्तरापथं** साधयित्वा स्वकीयसंवत्सरं प्रावीवृतत् । जैनश्च समजनि । अचीकरच्च जनितजननयनशैत्यानि जिनचैत्यानि । पञ्चाशद्वीरा अपि प्रत्येकं स्वस्वनामाङ्कितान्यन्तर्नगरं कारयांबभूवुर्जिनभवनानि ।

25　**॥ इति प्रतिष्ठानपत्तनकल्पः ॥**

॥ ग्रं० ४७ ॥

---

1 B नास्ति पदमेतत् । 2 Pa मृन्मय° ।

३४. प्रतिष्ठानपुराधिपतिसातवाहननृपचरित्रम् ।

अथ प्रसङ्गतः परसमयलोकप्रसिद्धं **सातवाहन**चरित्रशेषमपि किञ्चिदुच्यते–

श्रीसातवाहने क्षितिं रक्षति पञ्चाशद्वीराः **प्रतिष्ठान**नगरान्तस्तदा वसन्ति स्म । पञ्चाशच्च नगराद्बहिः । इतश्च तत्रैव पुरे एकस्य द्विजस्य सूनुर्दर्पोद्धुरः **शूद्रका**ख्यः समजनि । स च युद्धश्रमं दर्पात्कुर्वाणः पित्रा स्वकुलानुचितमिदमिति प्रतिषिद्धो नास्थात्[1] । अन्येद्युः **सातवाहननृपतिर्वापला-खूंदला**दि-पुरान्तर्वर्ति-वीरपञ्चाशदन्वितो द्विप-5 ञ्चाशद्धस्तप्रमाणां शिलां श्रमार्थमुत्पाटयन् दृष्टः पित्रा समं गच्छता द्वादशाब्ददेशीयेन **शूद्रकेण** । केनापि वीरेणाङ्गुलचतुष्टयम्, केनचित्त्वङ्गुलान्यष्टौ [वा] शिला भूमित उत्पाटिता । महीजानिना त्वाजानु नीता । इत्यवलोक्य **शूद्रकः** स्फूर्जदूर्जितमवादीत्–भो भो ! भवत्सु मध्ये किं शिलामिमामा मस्तकं न कश्चिदुद्धर्तुमीष्टे ! । तेऽपि सेर्ष्यमवादिषुर्यथा–त्वमेवोत्पाटय, यदि समर्थंमन्योऽसि । शूद्रकस्तदाकर्ण्य तां शिलां वियति तथोच्छालयांचकार यथा सा दूरमूर्ध्वमगमत् । पुनरवादि शूद्रकेण–यो भवत्स्वलंभूष्णुः स खल्विमां निपतन्तीं स्खलातु[2] । **सातवाहना**दिवीरैर्भयोद्भ्रान्तलोचनैरूचे 10 स एव सानुनयम्, यथा–भो महाबल ! रक्ष रक्षास्माकीनान् प्राणानिति । स पुनस्तां पतयालुं तथा मुष्टिप्रहारेण प्रहतवान् यथा सा त्रिखण्डतामन्वभूत् । तत्रैकं शकलं योजनत्रयोपरि न्यपतत् । द्वैतीयीकं च खण्डं नागह्रदे[3] । तृतीयं तु प्रतोलीद्वारे चतुष्पथमध्ये निपतितमद्यापि तथैव वीक्ष्यमाणमास्ते जनैः । तद्बलविलसित[4]चमत्कृतचेताः क्षोणिनेता **शूद्रकं** सुतरां सत्कृत्य पुरारक्षकमकरोत् । शस्त्रान्तराणि प्रतिषिध्य [5]दण्डधारस्तस्य दण्डमेवायुधमन्वज्ञासीत् । [स] च **शूद्रको** बहिश्चरान् वीरान् पुरमध्ये प्रवेष्टुमपि न दत्तवान्, अनर्थनिवारणार्थम् । अन्यदा स्वसौधस्योपरितले शयानः 15 **सातवाहनः** क्षितिपतिर्मध्यरात्रे शरीरचिन्तार्थमुत्थितः पुराद्बहिःपरिसरे करुणं रुदितमाकर्ण्य, तत्प्रवृत्तिमुपलब्धुं कृपाणपाणिः परदुःखदुःखितहृदयतया गृहान्निरगमत् । अन्तराले **शूद्रके**णावलोक्य सप्रश्रयं प्रणतः, पृष्टश्च महानिशायां निर्गमनकारणम् । धरणीपतिरवदद्–यदयं बहिः पुरः परिसरं करुणक्रन्दितध्वनिः श्रवणाध्वनि पथिकीभावमनुभवन्नस्ति, तत्कारणप्रवृत्तिं ज्ञातुं व्रजन्नसीति राज्ञोक्ते; **शूद्रको** व्यजिज्ञपत्–देव ! प्रतीक्षपादैः स्वसौधालङ्करणाय पादोऽवधार्यतामहमेव तत्प्रवृत्तिमानेष्यामीत्यभिधाय वसुधानायकं व्यावर्त्य स्वयं रुदितध्वन्यनुसारेण पुराद्बहिर्गन्तुं 20 प्रवृत्तः । पुरस्ताद्व्रजन् दत्तकर्णो **गोदावर्याः** श्रोतसि कञ्चन रुदन्तमश्रौषीत् । ततः परिकरबन्धं विधाय **शूद्रकः** तीर्त्वा यावत्सरितो मध्यं प्रयाति तावत्पयःपूरप्लाव्यमानं नरमेकं रुदन्तं वीक्ष्य बभाषे–भोः ! कस्त्वं किमर्थं च रोदिषीत्यभिहितः स नितरामरुदत् । अतिनिर्बन्धेन पुनः पृष्टः स्पष्टमाचष्ट–भोः साहसिकशिरोमणे ! मामितो निष्काश्य भूपतेः समीपं प्रापय, येन तत्र स्ववृत्तमाचक्षे–इत्युक्तः **शूद्रक**स्तमुत्पाटयितुं यावदयतिष्ट, तावन्नोत्पटति स्म सः । ततोऽधस्तात् केनापि यादसा मा विधृतोऽयं भवेदित्याशङ्क्य, सद्यः कृपाणिकामधो वाहयामास **शूद्रकः** । तदनु शिरोमात्रमेव 25 शूद्रकस्योद्धर्तुः करतलमारोहल्लघुतया तच्छिरः प्रक्षरद्रुधिरधारमवलोक्य **शूद्रको** विषादमापेदानश्चिन्तयति स्म–धिग् मामप्रहर्तरि प्रहर्तारम्, शरणागतघातुकं चेत्यात्मानं निन्दन् वज्राहत इव क्षणं[6] मूर्च्छितस्तस्थौ । तदनु समधिगतचैतन्यश्चिरमचिन्तयत्–कथमिवैतत् स्वदुश्चेष्टितमवनिपतये निवेदयिष्यामीति लज्जितमनास्तत्रैव काष्ठैश्चितां विरचय्य तत्र ज्वलनं प्रज्वाल्य तच्छिरः सह गृहीत्वा यावदुदर्चिषि प्रवेष्टुं प्रववृते, तावत्तेन मस्तकेन निजगदे–भो महापुरुष ! किमर्थमित्थं व्यवसीयते भवता ? । यावदहं शिरोमात्रमेवास्मि सैंहिकेयवत्सदा । तद्वृथा मा विषीद; प्रसीद मां राज्ञः समीप-30 मुपनय इति तद्वचनं निशम्य चमत्कृतचित्तः, प्राणित्ययमिति प्रहृष्टः **शूद्रक**स्तच्छिरः पटांशुकवेष्टितं विधाय प्रातः **सातवाहन**मुपानमत् । अपृच्छदथ पृथिवीनाथः–**शूद्रक** ! किमिदम् ? । सोऽप्यवोचत्–देव ! सोऽयं यस्य क्रन्दितध्वनिर्देवेन रात्रौ शुश्रुवे । इत्युक्त्वा तस्य प्रागुक्तं वृत्तं सकलमावेदयत् । पुना राजा तमेव मस्तकमप्राक्षीद्–भोः !

---

1 Pa नास्थानात् । 2 B स्खलातु । 3 B °ह्रदे । 4 C विलसितेन । 5 Pa नास्ति पदद्वयमेतत् । 6 B तत्क्षणं ।

कस्त्वं किमर्थं चात्र भवदागमनमिति ?। तेनाभिदधे–महाराज! भवतः कीर्तिमुभाकर्णि समाकर्ण्य करुणरुदितव्याजेनात्मानं ज्ञापयित्वा त्वामहमुपागमम्, दृष्टश्च भवान्, कृतार्थे मेऽद्य चक्षुषी जाते इति । कां कलां सम्यगवगच्छसि ?–इति राज्ञा पृष्टे, तेनोक्तम्–देव! गीतकलां वेद्मि। ततो राज्ञ आज्ञया निरवगीतं गीतं गातुं[1] प्रचक्रमे । क्रमेण तद्गान-कलया मोहिता सकलापि नृपतिप्रमुखा परिषत्। स च **मायासुर**नामकोऽसुरस्तां मायां निर्माय महीपतेर्महिषीं 5 महनीयरूपधेयामपजिहीर्षुरुपागतो बभूव। न च विदितचरमेतत्कस्यापि। लोकैस्तु शीर्षमात्रदर्शनात्तस्य प्राकृतभाषया **सीपुला** इति व्यपदेशः कृतः। तदनु प्रतिदिनं तस्मिन्नतितुंबरौ मधुरतरं गायति सति श्रुतं तत्स्वरूपं महादेव्या। दासीमुखेन भूपं विज्ञाप्य तच्छीर्षकं स्वान्तिकमानायितम् । प्रत्यहं तमजीगपत् राज्ञी। दिनान्तरे रात्रौ प्रस्तावमासाद्य सद्य एवापहरति स्म तां **मायासुरः**। आरोपयामास च घण्टाविलम्बिनामनि स्वविमाने। राज्ञी च करुणं क्रन्दितुमारे-भे–हाऽहं केनाप्यपह्रिये!। अस्ति कोऽपि वीरः †पृथिव्यां यो मां मोचयति । तच्च **खूंदला**भिख्येन वीरेण श्रुत्वा 10 धावित्वा व्योमन्युत्पत्य च तद्विमानस्य घण्टा पाणिना गाढमधार्यत। ततस्तत्प्राणेनावष्टब्धं विमानं पुरस्तान्न प्राचालीत्। तदनु चिन्तितं **मायासुरेण**–किमर्थं विमानमेतन्न सर्पति ? । यावदद्राक्षीत्तं वीरं हस्तावलम्बितघण्टं ततः† खड्गेन तद्धस्तमच्छिदत्। पतितः पृथिव्यां वीरः। स चासुरः पुरः प्राचलत् । ततो विदितदेव्यपहारवृत्तान्तः क्षितिकान्तः पञ्चाशतमेकोनां वीरानादिक्षत्–यत्पट्टदेव्याः शुद्धिः क्रियताम्, केनेयमपहृतेति। प्रागपि **शूद्रकं** प्रत्यसूयापराः ते प्रोचुः–महाराज! **शूद्रक** एव जानीते अनेनैव 'तच्छीर्षकमानीतं तेनैव' च देवी जह्रे। ततो नृपतिस्तस्मै कुपितः शूलारोपण-15 माज्ञापयत्। तदनु देशरीतिवशात्तं रक्तचन्दनानुलिप्ताङ्गं शकटे शाययित्वा, तेन सह गाढं बध्वा, शूलायै यावद्राजपु-रुषाश्चेलुस्तावत्पञ्चाशदपि वीरास्सम्भूय **शूद्रक**मवोचन्–भो महावीर! किमर्थमेवं रण्डेव म्रियते भवान्! । 'अशुभस्य कालहरण'मिति न्यायात् मार्गय नरेन्द्रात्कतिपयदिनावधिम्, शोधय सर्वत्र देव्यपहारिणम्[2], किमकाण्ड एव स्वकीयां वीरत्वकीर्तिमपनयसि । तेनोक्तम्–गम्यतां तर्हि उपराजम्, विज्ञाप्यतामेतमर्थं राजा । तैरपि तथाकृते प्रत्यानायितः **शूद्रकः** क्षितीन्द्रेण। तेनापि स्वमुखेन विज्ञप्तिः कृता–महाराज! दीयतामवधिर्येन विचिनोमि प्रतिदिशं देवीं तदप-20 हारिणं च[4]। राज्ञा दिनदशकमवधिर्दत्तः। **शूद्रक**गृहे च सारमेयद्वयमासीत्तत्सहचारि। नृपतिरवददेतद्भषणयुगलं प्रति-भूप्रायमस्मत्पार्श्वे मुञ्च, स्वयं पुनर्भवान् देव्युदन्तोपलब्धये हिण्डतां महीमण्डलम्। सोऽप्यादेशः प्रमाणमित्युदीर्यवीर्यवान् प्रतस्थे। भूचक्रशक्रस्तत्कौलेयकद्वन्द्वं शृङ्खलाबद्धं स्वशय्यापादयोरबध्नात्। **शूद्रक**स्तु परितः पर्यट्यमानोऽपि यावत्प्रस्तु-तार्थस्य वार्तामात्रमपि क्वापि नोपलेभे, तावदचिन्तयद्–अहो! ममेदमपयशः प्रादुरभूद्यदयं स्वामिद्रोही मध्ये भूत्वा देवी-मुपाजीहरदिति। न च क्वापि शुद्धिर्लब्धा तस्यास्तस्मान्मरणमेव मम शरणमिति विमृश्य दारुभिश्चितामरचयत्। ज्वलनं 25 चाज्वालयद्यावन्मध्ये प्राविशत्तावत्ताभ्यां शुनकाभ्यां देवताधिष्ठिताभ्यां ज्ञातं यदस्मदधिपतिर्निधनं धनायन्नस्तीति। ततो दैवतशक्त्या शृङ्खलानि भंक्त्वा निर्विलम्बं गतौ तौ तत्र यत्रासीच्छूद्रकरचिता चिता। दशनैः केशानाकृष्य **शूद्रकं** बहि-र्निष्कासयामासतुः। तेनाप्यकस्मात्तौ विलोक्य विस्मितमनसा निजगदे–रे पापीयांसौ! किमेतत्कृतं भवद्भ्यामशुभवद्-भ्याम्। राज्ञो मनसि विश्वासनिरासो भविष्यति, यत्प्रतिभुवावपि तेनात्मना सह नीताविति। भषणाभ्यां बभाषे–धीरो भव, अस्मद्दर्शितां दिशमनुसर, सरभसं का चिता तवेत्यभिधाय पुरोभूय प्रस्थितौ तेन सार्द्धम्। क्रमात्प्राप्तौ **कोल्ला-**30 **पुरम्**। तत्रस्थं **महालक्ष्मी**देव्या भवनं प्रविष्टौ। तत्र **शूद्रक**स्तां देवीमभ्यर्च्य कुशास्तरासीनस्त्रिरात्रमुपावसत्। तदनु प्रत्यक्षीभूय भगवती **महालक्ष्मी**स्तमवोचत्–वत्स! किं मृगयसे ?। **शूद्रकेणो**क्तम्–स्वामिनि! **सातवाहन**मही-पालमहिष्याः शुद्धिं वद; क्वास्ते, केनेयमपहृता ?। श्रीदेव्योदितम्–सर्वान् यक्षराक्षसभूतादिदेवगणान् सम्मील्य तत्प्रवृत्ति-महं निवेदयिष्यामि। परं तेषां कृते त्वया बल्युपहारादिप्रगुणीकृत्य धार्यम्। यावच्च ते कणेहत्य बल्याद्युपभुज्य प्रीता न भवेयुस्तावत्त्वया विघ्ना रक्षणीयाः। ततः **शूद्रक**स्तेषां देवतानां तर्पणार्थं कुण्डं विरचय्य होममारेभे। मिलिताः

---

1 B निरवगानगातुं। † एतदन्तर्गताः पंक्तयः पतिताः B आदर्शे। 2 एते शब्दा अनुपलभ्याः C प्रतौ। 3 Pa °परिहारेणं। 4 B °पहारिणीं वा।

सकलदैवतगणाः, स्वां स्वां भुक्तिममिमुखेन जगृहे । तावत्तद्धोमधूमः प्रसृमरः प्राप तत्स्थानं यत्र **मायासुरो**ऽभूत् । तेनापि परिज्ञाततल्लक्ष्म्यादिष्ट**शूद्रक**होमस्वरूपेण प्रेषितः स्वभ्राता **कोल्लासुर**नामा होमप्रत्यूहकरणाय । समागतश्च वियति **कोल्लासुरः** स्वसेनया समम् । दृष्टश्च दैवतगणैश्चकितं च तैः । ततो भषणौ दिव्यशक्त्या युयुधाते दैत्यैः सह । क्रमान्मारितौ च तौ दैत्यैः । तत **शूद्रकः** स्वयं योद्धुं प्रावृतत् । क्रमेण दण्डव्यतिरिक्तप्रहरणान्तराभावाद्दण्डेनैव बहूनिधनं नीतवानसुरान् । ततो दक्षिणबाहुं दैत्यास्तस्य[1] चिच्छिदुः । पुनर्वामदोष्णैव दण्डयुद्धमकरोत् । तस्मिन्नपि च्छिन्ने दक्षिणां- 5
घ्रिणोपात्तदण्डो योद्धुं लग्नः । तत्रापि दैत्यैर्लूने वामपदात्तयष्टिरयुध्यत तमपि क्रमादच्छिदन्नसुराः । ततो दन्तैर्दण्डमादाय युयुधे । ततस्तैर्मस्तकमच्छेदि । अथाकण्ठतृप्ता देवगणास्तं **शूद्रकं** भूमिपतितशिरस्कं दृष्ट्वा—अहो ! अस्मद्भुक्तिदातुर्वराकस्यास्य किं जातमिति परितप्य योद्धुं प्रवृत्ताः **कोल्लासुर**ममारयन् । ततः **श्रीदेव्या** अमृतेनाभिषिच्य पुनरनुसंहिताङ्गश्चक्रे **शूद्रकः,** प्रत्युज्जीवितश्च । सारमेयावपि पुनर्जीवितौ । देवी च प्रसन्ना सती तस्मै खड्गरत्नं प्रददौ[2] । अनेन त्वमजय्यो भविष्यसीति च वरं व्यतरत् । ततो महालक्ष्म्यादिदैवतगणैः सह **सातवाहन**देव्याः शुद्ध्यर्थं समग्रमपि 10
भुवनं परिभ्राम्य प्राप्तः **शूद्रको** महार्णवम् । तत्र चैकं वटतरुमुच्चैस्तरं निरीक्ष्य विश्रामार्थमारुरोह । यावत्पश्यति तच्छाखायां लम्बमानमधःशिरसं काष्ठकीलिकाप्रवेशितोर्ध्वपादं पुरुषमेकम् । स च प्रसारितजिह्वोऽन्तर्जलं विचरतो जलचरादीन् भक्षयन् वीक्षितस्तैः । पृष्टश्च **शूद्रकेण**—कस्त्वम् ?, किमर्थं चेत्थं लम्बितोऽसि ? । तेनोक्तम्—अहं **मायासुर**स्य कनिष्ठो भ्राता स च मदनोन्मदिष्णुर्मदग्रजः । **प्रतिष्ठाना**धिपतेः **सातवाहन**स्य महिषीं रिरंसुरपाहरत्**सीता**मिव **दशवदनः** । सा च पतिव्रता तन्नेच्छति । तदनु मया प्रोक्तोऽग्रजन्मा—न युज्यते परदारा- 15
पहरणं तव ।

विक्रमाक्रान्तविश्वोऽपि परस्त्रीषु रिरंसया । कृत्वा कुलक्षयं प्राप नरकं **दशकन्धरः** ॥ १ ॥

इत्यादि वाग्भिषिद्धः क्रुद्धो मह्यं **मायासुरो**ऽस्यां वटशाखायां टङ्कित्वा मामित्थं व्यडम्बयत् । अहं च प्रसारितरसनः समुद्रान्तः सञ्चरन्तो जलचरादीनभ्यवहरन् प्राणयात्रां करोमि । इति श्रुत्वा **शूद्रको**ऽप्यभाणीत्—अहं तस्यैव महीभृतो भृत्यः **शूद्रक**नामा । तामेव देवीमन्वेष्टुमागतोऽस्मि । तेनोक्तम्—एवं चेत्तर्हि मां मोचयत, यथाहं सह भूत्वा 20
तं दर्शयामि, तां च देवीम् । तेन स्वस्थानं परितो जातुषं दुर्गं कारितमस्ति । तच्च निरन्तरं प्रज्वलदेवास्ति ततस्तदुल्लंघ्य, मध्ये प्रविश्य, तं निपात्य, देवी प्रत्याहर्तव्या—इत्याकर्ण्य **शूद्रक**स्तेन कृपाणेन तत्काष्ठबन्धनानि च्छित्वा तं पुरोधाय, दैवतगणपरिवृतः प्रस्थाय, प्राकारमुल्लंघ्य, तत्स्थानान्तः प्राविशत् । दैवतगणांश्चावलोक्य **मायासुरः** स्वसैन्यं युद्धाय प्रजिघाय । तस्मिन्पञ्चतामञ्चिते स्वयं योद्धुमुपतस्थे । ततः क्रमेण **शूद्रक**स्तेनासिना तमवधीत् । ततो घण्टावलम्बिविमानमारोप्य देवीं दैवतगणैः सत्रा प्रस्थितः **प्रतिष्ठानं** प्रति । 25

इतश्च दशमं दिनमवधीकृतमागतमवगत्य जगत्यधिपतिर्ध्यातवान्—अहो ! न मम महादेवी, न च **शूद्रक**वीरो, नापि च तौ रसनालिहौ । सर्वं मयैव कुबुद्धिना विनाशितमिति शोचयन् सपरिच्छद एव प्राणत्यागं चिकीर्षुः पुराद्बहिश्चितामरचयच्चन्दनादिदारुभिः । यावत्क्षणादाशुशुक्षणिं क्षेप्स्यति परिजनश्चितौ तावद्वर्द्धापक एको देवगणमध्यात्समायासीद्व्यजिज्ञपच्च सप्रश्रयम्—देव ! दिष्ट्या वर्द्धसे महादेव्यागमनेन । तन्निशम्य श्रवणरम्यं नरेश्वरः स्फुरदानन्दकन्दलितहृदय ऊर्ध्वमवलोकयन्नालुलोके नभसि दैवतगणं **शूद्रकं** च । अयमपि विमानावदतीर्य राज्ञः पदोऽपतत्; महादेवी च 30
अभिनन्द सानन्दं मेदिनीन्द्रः **शूद्रकम्,** राज्यार्धं च तस्मै प्रादित । सोत्सवमन्तर्नगरं प्रविश्य श्रुत**शूद्रक**चारुचरितः समं महिष्या राज्यश्रियमुपबुभुजे महाभुजः ।

इत्थंकारं नानाविधानान्यवदानानि **हाल**क्षितिपालस्य, कियन्ति नाम व्यावर्णयितुं पार्यते । स्थापिता चानेन **गोदावरी**सरित्तीरे महालक्ष्मीः । प्रासादे अन्यान्यपि यथार्हं दैवतानि निवेशितानि तत्तत्स्थानेषु । राज्यं प्राज्यं चिरं

1 'तस्य' नास्ति Pa । 2 B ददौ ।

भुञ्जाने जगतीजानावन्यदा कश्चिद्दारुभारहारकः कस्यचिद्वणिजस्य वीथौ प्रत्यहं चारूणि दारूण्याहृत्य विक्रीणीते स्म । दिनान्तरे च तस्मिन्ननुपेयुषि वणिजा तद्भगिनी पृष्टा–किमर्थं भवद्भ्राताऽद्य नागतो मद्वीथ्याम् ? । तया बभाणे–श्रेष्ठिश्रेष्ठ ! मत्सौदर्यः स्वर्गिषु सम्प्रति प्रति[1]वसति । वणिगभाणत्कथमिव ? । साऽवदत्–कङ्कणबन्धादारभ्य विवाहप्रकरणे दिनचतुष्टयं नरः स्वर्गिष्विव वसन्तमात्मानं मन्यते । तत्तदुत्सवालोकनकुतूहलात् । तच्चाकर्ण्य राजाप्यचिन्तयत्–अहो ! 5 अहं किं न स्वर्गिषु वसामि चतुर्षु दिनेष्वनवरतं विवाहोत्सवमय एव स्थाप्यामीति विचार्य चातुर्वर्ण्ये यां यां कन्यां युवतिं वा रूपशालिनीं पश्यति शृणोति स्म वा, तां तां सोत्सवं पर्यणैषीत् । एवं च भूयस्यनेहसि गच्छति लोकैश्चिन्तितम्–अहो ! कथं भाव्यमनपत्यैरेव सर्ववर्णैः स्थेयम् । सर्वकन्यास्तावद्राजैव विवोढा । योषिदभावे च कुतः सन्ततिरिति । एवं विषण्णेषु लोकेषु **विवाहवाटिका**नामनि ग्रामे वास्तव्य एको द्विजः **पीठजादेवी**माराध्य व्यजिज्ञपद्–भगवति ! कथं विवाहकर्मास्मदपत्यानां भावीति ! । देव्योक्तम्–भो वाडव ! त्वद्भवनेऽहमात्मानं कन्यारूपं कृत्वावतरिष्यामि । यदा मां 10 राजा प्रार्थयते तदाहं तस्मै देया; शेषमहं भलिष्ये । तथैव राजा तां रूपवतीं श्रुत्वा विप्रमयाचत । सोऽपि जगाद–दत्ता मया, परं महाराज ! तत्रागत्य मत्कन्योद्वोढव्या । प्रतिपन्नं राज्ञा । गणकदत्ते लग्ने क्रमाद्विवाहाय प्रचलितः । प्राप्तश्च तं ग्रामं श्वसुरकुलं च नृपतिः । देशाचारानुरोधाद्वधूवरयोरन्तराले जवनिका दत्ता । अञ्जलिर्युगन्धरीलाजैर्भृतो लग्नवेलायां तिरस्करिणीमपनीय यावदन्योऽन्यस्य शिरसि लाजान् विकिरीतुं प्रवृत्तौ । तदनु किल हस्तलेपो भविष्यतीति तावद्राजा तां रौद्ररूपां राक्षसीमिवैक्षिष्ट । ते च लाजाः कठिनपाषाणकर्कररूपा राज्ञः शिरसि लगितुं लग्नाः । क्षितिपति-15 रपि किमपि[2] वैकृतमिदमिति विभावयन् पलायितस्तावत्सा पृष्ठलग्नाऽश्मशकलानि वर्षन्ती प्राप्ता । ततो नरपतिर्नागह्रदं प्राविशन्निजजन्मभूमिम् । तत्रैव च निधनमानश इति । अद्यापि सा **पीठजादेवी** प्रतोल्या बहिरास्ते निजप्रासादस्था। **शूद्रको**ऽपि क्रमेण **कालिका**देव्याऽजारूपं विकृत्य वापीं प्रविष्टया करुणरसितेन विप्रलभ्य तन्निष्कासनार्थं प्रविशन् । पतितस्य तस्य कृपाणस्य कूपद्वारे तिर्यक्पतनाच्छिन्नाङ्गः पञ्चतामानञ्च । महालक्ष्म्या हि वरं वितरणावसरेऽस्मादेव कौक्षेयकात्तव दिष्टान्तावाप्तिर्भवित्रीत्यादिष्टमासीत् । ततः **शक्तिकुमारो** राज्येऽभिषिक्तः सातवाहनायनिः । तदनन्तरमद्यापि 20 राजा न कश्चित्**प्रतिष्ठाने** प्रविशति वीरक्षेत्रे इति ।

अत्र च यदसम्भाव्यं क्वचिदूचे तत्र परसमय एव । मन्तव्यो हेतुर्यन्नासंगतवाग्जनो जैनः ॥

इति श्री**प्रतिष्ठान**कल्पः, प्रसङ्गतः **सातवाहन**चरित्रलेशश्च विरचितः श्री**जिनप्रभ**सूरिभिः ।

चक्रे **प्रतिष्ठान**कल्पः श्री**जिनप्रभ**सूरिभिः । **सातवाहन**भूपस्य कथालेशश्च प्रसङ्गतः ॥

॥ ग्रं० १६६, अ० ९ ॥

---

1 B 'प्रति' नास्ति । 2 B नास्ति 'किमपि' ।

३५. चम्पापुरीकल्पः ।

कृतदुर्नयभङ्गानाम**ङ्गानां**[1] जनपदस्य भूषायाः । **चम्पापुर्याः** कल्पं जल्पामस्तीर्थधुर्यायाः[2] ॥ १ ॥

अस्यां द्वादशमजिनेन्द्रस्य [3]**श्रीवासुपूज्यस्य** त्रिभुवनजनपूज्यानि गर्भावतार[4]-जन्म-प्रव्रज्या-केवलज्ञान-निर्वाणोपगमलक्षणानि पञ्चकल्याणकानि जज्ञिरे ॥ १ ॥

अस्यामेव श्री**वासुपूज्य**जिनेन्द्रपुत्र**मघवन्**नृपतिपुत्री**लक्ष्मी**कुक्षिजाता **रोहिणी** नाम कन्याऽष्टानां पुत्राणामुपरि जज्ञे । सा च स्वयंवरेऽ**शोक**राजन्यकण्ठे वरमालां निक्षिप्य तं परिणीय पट्टराज्ञी जाता । क्रमेणाष्टौ पुत्रांश्चतस्रश्च[5] पुत्रीरजीजनत् । अन्यदा **श्रीवासुपूज्य**शिष्ययोः **रूप्यकुम्भ-स्वर्णकुम्भ**योर्मुखादहष्टदुःखत्वे हेतुं प्राग्जन्मचीर्णं रोहिणीतपः श्रुत्वा सोद्यापनविधिं[6] प्राचीकटन्[7] मुक्तिं च सपरिच्छदाऽगच्छत् ॥ २ ॥

अस्यां **करकण्डु**[8]नामधेयो भूमण्डलाखण्डलः पुरासीद्यः **कादम्बर्या**मटव्यां **कलिगिरे**रुपत्यकावर्तिनि कुण्डनाम्नि सरोवरे श्री**पार्श्वनाथं** छद्मस्थावस्थायां[9] विहरन्तं हस्तिव्यन्तरानुभावात्कलिकुण्डतीर्थतया प्रतिष्ठापितवान् ॥ ३ ॥ 10

अस्यां पुनः[10] **सुभद्रा** महासती पाषाणमयविकटकपाटसम्पुटपिहितास्तिस्रः प्रतोलीः [11]शीलमाहात्म्यादामसूत्रतन्तुवेष्टितेन तितउना कूपाज्जलमाकृष्य तेनाभिषिच्य सप्रभावनमुदघाटत् । एकां तु तुरीयां प्रतोलीमन्याऽपि या किल मत्सदृशा सुचरित्रा भवति तयेयमुद्घाटनीयेति भणित्वा राजादिजनसमक्षं तथैव पिहितामेवास्थापयत् । सा च तद्दिनादारभ्य चिरकालं तथैव दृष्टा जनतया । क्रमेण **विक्रमादित्यवर्षेषु षष्ट्यधिकत्रयोदशशतेष्वतिक्रान्तेषु लक्षणावती**हम्मीरश्रीसुरत्राण**समसदीनः** [12]**शङ्करपुर**दुर्गोपयोगिपाषाणग्रहणार्थं तां प्रतोलीं पातयित्वा कपाटसम्पुटमग्रहीत् ॥ ४ ॥ 15

अस्यां **दधिवाहन**नृपतिर्महिष्या **पद्मावत्या** सह तद्दौहृदपूरणार्थमनेकपारूढः सञ्चरन् स्मृतारण्यानीविहारेण करिणा तां प्रतिव्रजताऽपवाहितः स्वयं तरुशाखामालम्ब्य स्थितः । करिणि पुरः सञ्चरिते व्यावृत्त्येमामेव स्वपुरीमागमत् । देवी चासामर्थ्यात्तदारूढैवारण्यानीमगात् । तदवतीर्णा क्रमेण सूनुं सुषुवे । स च **करकण्डु**र्नाम क्षितिपतिरजनि । **कलिङ्गे**षु पित्रा सार्धं युध्यमानः प्रतिषिद्धः[13] स्वजनन्या [14]आर्यया । क्रमेण महावृषभस्य यौवन-वार्द्धकदशादर्शनाज्जातः प्रत्येकबुद्धः सिद्धिं चाससाद ॥ ५ ॥ 20

अस्यां **चन्दनबाला दधिवाहन**नृपतिनन्दना जन्म[15] उपलेभे । या किल भगवतः श्री**महावीरस्य कौशाम्ब्यां** सूर्पकोणस्थकुल्माषैः पारणाकारणया पञ्चदिनोनषण्मासावसाने द्रव्य-क्षेत्र-काल-भावाऽभिग्रहानपूरयत् ॥६॥

अस्यां **पृष्ठचम्प**या सह श्री**वीर**स्त्रीणि वर्षारात्रसमवसरणानि चक्रे ॥ ७ ॥

अस्या एव परिसरे श्री**श्रेणिक**सूनुर**शोकचन्द्रो** [16]नरेन्द्रः **कूणिका**पराख्यः श्री**राजगृहं** जनकशोकाद्विहाय नवीनां **चम्पा**मचीकरच्चारुचम्पकरोचिष्णुं राजधानीम् ॥ ८ ॥ 25

अस्यामेव **पाण्डु**कुलमण्डनो दानशौण्डेषु दृष्टान्तः श्री**कर्ण**नृपतिरशाद्राज्यश्रियम् । दृश्यन्ते चाद्यापि तानि तानि तदवदातस्थानानि शृङ्गारचतुरिका[17]दीनि पुर्यामस्याम् ॥ ९ ॥

अस्यां सम्यग्दृशां निदर्शनं **सुदर्शन**श्रेष्ठी **दधिवाहन**भूपस्य राज्याऽ**भया**ख्यया सम्भोगार्थमुपसर्ग्यमाणः

---

1 D °भङ्गाजन° । 2 P विहाय सर्वत्र 'तीर्थपुर्यायाः ।' 3 Pa श्रीमे(दे?)ववासु° । 4 B C गर्भावतर° । 5 D °चतस्रः । 6 C D °विधि । 7 B D P प्राचीकशन् । 8 P करकुण्ड° । 9 P छद्मस्थावस्थां समधिगत्य विहरन्तं । 10 P विना नास्त्यन्यत्र 'पुनः' । 11 P शीतलकरचन्द्रलीलशीलमाहा° । 12 B शङ्करदुर्गोप° । 13 B P D प्रतिषिध्य । 14 B C D आर्यया जनन्या । 15 C जन्म लेभे । 16 P श्रेणिकसूनुरशोकचन्द्रापरनामधेयः । 17 B चतुरगाका°; P D चतुरका° ।

क्षितिपतिवचसा वधार्थं नीतः स्वकीयनिष्कम्पशीलसम्पत्प्रभावाकृष्टशासनदेवतासांनिध्यात् [1]शूलीं [2]हैमसिंहासनतामनैषीत्; तरवारिं च निशितं सुरभिसुमनोदाम भूय मनोदामनयत् ॥ १० ॥

अस्यां च **कामदेवः** श्रेष्ठी श्री**वीर**स्योपासकाग्रणीरष्टादशकनककोटिस्वामी गोदशसहस्रयुतषड्गोकुलाधिपति[3]-**भद्रा**पतिरभवत् । यः पौषधागारस्थितो मिथ्यादृग्देवेन पिशाचगजभुजगरूपैरुपसर्गितोऽपि न क्षोभमभजत् । श्लाघितश्च 5 भगवताऽन्तःसमवसरणम् ॥ ११ ॥

अस्यां विहरन् श्री**शय्यम्भव**सूरिश्चतुर्दशपूर्वधरः स्वतनयं **मनका**भिधानं **राजगृहा**दागतं प्रव्राज्य तस्यायुः षण्मासावशेषं श्रुतज्ञानोपयोगेनाकलय्य तदध्ययनार्थं **दशवैकालिकं** पूर्वगतान्निर्व्यूढवान् । [4]तत्रात्मप्रवादात् षड्जीवनिकां, कर्मप्रवादात् पिण्डैषणां, सत्यप्रवादाद्वाक्यशुद्धिं, अवशिष्टाध्ययनानि प्रत्याख्यानपूर्वतृतीयवस्तुत[5] इति ॥ १२ ॥

अस्यां वास्तव्यः **कुमारनन्दी** सुवर्णकारः स्वविभववैभवाभिभूतधनदमदो[6]ऽकृशकृशानुप्रवेशात्पञ्चशैलाधिपत्य-10 मधिगत्य प्राग्भवसुहृदच्युतविबुधबोधितश्चारुगोशीर्षचन्दनमयीं जीवन्तस्वामिनीं सालङ्कारां देवाधिदेवश्री**महावीर**प्रतिमां निर्ममे ॥ १३ ॥

अस्यां **पूर्णभद्रे**[7] चैत्ये श्री**वीरो** व्याकरोद्-योऽ**ष्टापद**मारोहति स तद्भव एव सिध्यतीति ॥ १४ ॥

अस्यां **पालित**नामा श्री**वीरो**पासको वणिक् । तस्य पुत्रः समुद्रयात्रायां समुद्रे प्रसूत इति **समुद्रपालो** वध्यं नीयमानं वीक्ष्य प्रतिबुद्धः [8]सिद्धिं च प्रापत् ॥ १५ ॥

15 अस्यां **सुनन्दः** श्राद्धः[9] साधूनां मलदौर्गन्ध्यं[10] निन्दित्वा मृतः **कौशाम्ब्या**मिभ्यसुतोऽभूद्व्रतं चाग्रहीत् । उदीर्णदुर्गन्धः कायोत्सर्गेण देवतामाकृष्य स्वाङ्गे सौगन्ध्यमकार्षीत् ॥ १६ ॥

अस्यां **कौशिकार्य**शिष्याऽङ्गर्षि-**रुद्रका**[11]भ्याख्यानसंविधानकं सुजातप्रियंग्वादिसंविधानकानि च जज्ञिरे॥१७॥

इत्यादि नानाविधसंविधानकरत्नप्रकटनाना[12]वृत्तनिधानमियं पुरी । अस्याश्च प्राकारभित्तिं प्रियसखीव प्रतिक्षणमालिङ्गति सर्वाङ्गं[13] पावनघनरसपूरितान्तरा सरिद्वरा प्रसृत्वरवीचिभुजाभिः ॥ १८ ॥

20 उत्तमतमनरनारीमुक्तामणिधोरणिप्रसवशुक्तिः । नगरी विविधाद्भुतवस्तुशालिनी मालिनी जयति ॥ १ ॥

जन्मभू**र्वासुपूज्य**स्य तद्भक्त्या स्तूयते बुधैः । **चम्पा**याः कल्पमित्याहुः श्री**जिनप्रभ**सूरयः[14] ॥ २ ॥

॥ इति श्रीचम्पापुरीकल्पः समाप्तः ॥

॥ ग्रं० ४७ ॥

---

1 B Pa शूलं । 2 P हिरण्मय° । 3 C गोकुलपतिः । 4 B तत्रात्म° । 5 C D वस्तु इति । 6 B धनदमानो । 7 P पूर्णभद्रचैत्ये । 8 P सिद्धिं चाससाद हतविषादाम् । 9 P श्रावकः । 10 B C Pa मलदुर्गन्धं । 11 Pa °रुद्रकाव्याख्यान°; C °रुद्रकाव्याख्यान° । 12 P °प्रकटमाना° । 13 P विहाय नास्ति 'सर्वाङ्गं' । 14 Pa सूरिभिः ।

३६. पाटलिपुत्रनगरकल्पः ।

आनम्य श्री**नेमि**नमनेकपुंरत्नजनिपवित्रस्य । श्री**पाटलिपुत्रा**ह्वयनगरस्य प्रस्तुमः कल्पम्* ॥ १ ॥

पूर्वं किल श्री**श्रेणिक**महाराजेऽस्तंगते तदात्मजः **कूणिकः** पितृशोका**च्चम्पा**पुरीं न्यवीविशत् । तस्मिंश्चाले-
ऽप्यशेषतां प्रयाते तत्सूनु**रुदायि**नामधेयश्चम्पायां क्षोणिजानिरजनिष्ट । सोऽपि स्वपितुस्तानि तानि सभाक्रीडाशयना-
सनादिस्थानानि[1] पश्यन्नस्तोकं शोकमुदवहत् । ततोऽमात्यानुमत्या[2] नूतनं नगरं निवेशयितुं नैमित्तिकवरान् स्थानगवेषणा- 5
यादिक्षत् । तेऽपि सर्वत्र तांस्तान् प्रदेशान् पश्यन्तो **गङ्गा**तटं ययुः । तत्र कुसुमपाटलं[3] पाटलितरुं प्रेक्ष्य तच्छोभाच-
मत्कृतास्तच्छाखायां निषण्णं चाषं व्यात्तवदनं स्वयं निपतत्कीटकपेटकमालोक्य चेतस्यचिन्तयन्–अहो ! यथाऽस्य
चाषपक्षिणो मुखे स्वयमेत्य कीटाः पतन्तः सन्ति तथात्र स्थाने नगरे निवेशितेऽस्य राज्ञः स्वयं श्रियः समेष्यन्ति ।
तच्च ते राज्ञे व्यजिज्ञपन् । सोऽप्यतीव प्रमुदितः । तत्रैको जरन्नैमित्तिको व्याहरद्–देव ! पाटलातरुरयं न सामान्यः ।
पुरा हि ज्ञानिना कथितम्– 10

पाटलाद्रुः पवित्रोऽयं महामुनिकरोटिभूः । एकावतारोऽस्य मूलजीवश्चेति विशेषतः ॥ २ ॥

राज्ञोक्तम्–कतमः स महामुनिः ? । तदनु जगाद नैमित्तिकः–श्रूयतां देव ! । **उत्तरमथुरा**यां वास्तव्यो **देव-
दत्ता**ख्यो वणिक्पुत्रो दिग्यात्रार्थं **दक्षिणमथुरा**मगमत् । तत्र तस्य **जयसिंह**नाम्ना वणिक्पुत्रेण सह सौहृदम-
भवत् । अन्यदा तद्गृहे भुञ्जानोऽ**न्निका**नाम्नीं तज्जामिं स्थाले भोजनं[4] परिवेष्य वातव्यजनं कुर्वन्तीं रम्यरूपामालोक्य
तस्यामनुरक्तो द्वितीयेऽह्नि [5]चरकान् प्रेष्य **जयसिंहं** तामयाचिष्ट । सोऽभ्यधाद्–अहं तस्मा एव ददे [6]स्वस्वसारं यो 15
मद्गृहाद्दूरे न भवति । प्रत्यहं तां तं च यथा पश्यामि; यावदपत्यजन्म । तावद्यदि मद्गृहे स्थाता [7]तदा तस्य जामिं
दास्यामीति । **देवदत्तो**ऽप्योमित्युक्त्वा शुभेऽह्नि तां पर्यणैषत् । तया सह भोगान् भुञ्जतस्तस्यान्यदा पितृभ्यां लेखः
प्रैषि[8] । तं[9] वाचयतस्तस्य नेत्रे वर्षितुमश्रूणि[10] प्रवृत्ते । ततस्तया हेतुं पृष्टोऽपि यावन्नाब्रवीत् तावत्तयाऽऽदाय लेखः स्वयं
वाचितः । तत्र चेदं [11]लिखितमासीद् गुरुभ्याम्–यद्वत्स ! आवां वृद्धौ निकटनिधनौ; यदि च नौ जीवन्तौ दिदृक्षसे तदा
द्रागागन्तव्यमिति । तदनु सा पतिमाश्वास्य स्वभ्रातरं हठादप्यऽन्वजिज्ञपत् । भर्त्रा सह प्रतस्थे चोत्तरमथुरां प्रति सगर्भा । 20
क्रमान्मार्गे [12]सा [13]सूनुमसूत । नामास्य पितरौ करिष्यत इति देवदत्तोक्ते परिजनस्तमर्भकम**न्निकापुत्र** इत्युल्लापितवान् ।
क्रमेण देवदत्तोऽपि स्वपुरीं प्राप[14] । पितरौ प्रणम्य च शिशुं तयोरार्पयत् । **सन्धीरणे**त्याख्यां तौ [15]नप्तुः पुनश्चक्राते,
तथाप्यन्निकापुत्र इत्येव पप्रथेऽसौ । वर्द्धमानश्च प्राप्ततारुण्योऽपि भोगांस्तृणवद्विधूय **जयसिंहाचार्य**पार्श्वे दीक्षामग्रहीत्[16] ।
गीतार्थीभूतः प्रापदाचार्यकम् । अन्यदा विहरन् सगच्छो वार्द्धके **पुष्पभद्र**पुरं **गङ्गा**तटस्थं प्राप्तः । तत्र **पुष्पकेतु**र्नृपस्तद्देवी
पुष्पवती तयोर्युग्मजौ **पुष्पचूलः पुष्पचूला** चेति पुत्रः पुत्री चाभूताम् । तौ च सह वर्द्धमानौ क्रीडन्तौ च परस्परं 25
प्रीतिमन्तौ जातौ । राजा दध्यौ–यद्येतौ दारकौ वियुज्येते तदा नूनं न[17] जीवतः; अहमप्यनयोर्विरहं सोढुमनीशस्तस्मा-
दनयोरेव विवाहं करोमीति ध्यात्वा मन्त्रिमित्र[18]पौरांश्छलेनापृच्छद्–भो ! यद्रत्नमन्तःपुरे उत्पद्यते तस्य कः प्रभुः ? ।
तैर्विज्ञप्तम्–देव ! अन्तःपुरोत्पन्नस्य किं वाच्यम्, यद्देशमध्ये[19]ऽप्युत्पद्यते रत्नं तद्राजा यथेच्छं विनियुंक्ते । कोऽत्र [20]बाधः ? ।
तच्छ्रुत्वा स्वाभिप्रायं निवेद्य देव्यां वारयन्त्यामपि तयोरेव सम्बन्धमघटयन्नृपः । द्वौ दम्पती भोगान् भुङ्क्तः स्म । राज्ञी तु
पत्यपमाने[21] वैराग्याद्व्रतमादाय स्वर्गे देवोऽभूत् । अन्यदा पुष्पकेतौ कथाशेषे **पुष्पचूलो** राजाऽभूत्[22] । स च देवः प्रयुक्ता- 30
वधिस्तयोरकृत्यं ज्ञात्वा स्वप्ने **पुष्पचूला**या नरकानदर्शयत्तद्दुःखानि च । सा च प्रबुद्धा भीता च पत्युः सर्वमावेदयत् । सोऽपि

---

* C आदर्शे इदं पद्यं नास्ति । 1 B °सनादीनि । 2 B P अमात्या । 3 P कुसुमपाटलिं । 4 P भोज्यं । 5 P D वरकान् । 6 A C 'स्व' नास्ति । 7 B D Pa 'तदा' नास्ति । 8 P प्रेषितः । 9 P 'तं' नास्ति । 10 B D °अश्रु । 11 P लेखित° । 12 B 'सा' नास्ति । 13 P सुत° । 14 B C प्राप्य । 15 B पुण° । 16 P कक्षीचक्रे । 17 B नास्ति 'न' । 18 B मन्त्रिमन्त्रि°; P मन्त्रिमन्त्र° । 19 Pab मध्येषु । 20 P बाध्यः । 21 B D °पमान° । 22 P जज्ञे ।

शान्तिकमचीकरत्। स च देवः प्रतिनिशं[1] नरकांस्तस्या अदर्शयत्। राजा तु सर्वांस्तीर्थिकानाहूय पप्रच्छ—कीदृशा नरकाः स्युरिति। कैश्चिद्गर्भवासः, कैश्चन गुप्तिवासः, कैरपि दारिद्यम्, अपरैः पारतन्त्र्यमिति तैर्नरका[2] आचचक्षिरे। राज्ञी तु[3] मुखं मोटयित्वा तान् विसंवादिवचसो व्यसाक्षीत्। अथ नृपोऽन्निकापुत्राचार्यमाकार्य तदेवाप्राक्षीत्। तेन तु यादृशान् देव्यदर्शयत्तादृशा एवोक्ता नरकाः। राज्ञी प्रोचे—भगवन्! भवद्भिरपि किं स्वप्नो दृष्टः?। कथमन्यथेत्थं 5 वित्थ?। सूरिरवदद्—भद्रे! जिनागमात्सर्वमवगम्यते। पुष्पचूलाऽवोचत्—भगवन्! केन कर्मणा ते प्राप्यन्ते। गुरुरगृणाद्—भद्रे! महारम्भपरिग्रहैर्गुरुप्रत्यनीकतया पञ्चेन्द्रियवधान्मांसाहाराच्च तेष्वङ्गिनः पतन्ति। क्रमेण स सुरस्तस्यै स्वर्गानदर्शयत् स्वप्ने। राज्ञा तथैव पाखण्डिनः पृष्टास्तानपि व्यभिचारिवाचो विसृज्य भूपस्तमेवाचार्यं स्वर्गस्वरूपमप्राक्षीत्। तेनापि यथावत्तत्रोदिते स्वर्गासिकारणमपृच्छद्राज्ञी। ततः सम्यक्त्वमूलौ गृहि-यतिधर्मावादिशन्मुनीशः। प्रतिबुद्धा च सा लघुकर्मा। नृपमनुज्ञापयति स्म प्रव्रज्यायै। सोऽप्यूचे—यदि मद्गृह एव [4]भिक्षामादत्से तदा प्रव्रज। तयोरीकृते नृप-10 वचसि, सा सोत्सवमभूत्तस्याचार्यस्य शिष्या गीतार्था च। अन्यदा भाविदुर्भिक्षं श्रुतोपयोगात् ज्ञात्वा सूरिर्गच्छं देशान्तरे प्रैषीत्। स्वयं तु परिक्षीणजङ्घाबलस्तत्रैवास्थात्; भक्तपानं च पुष्पचूलाऽन्तःपुरादानीय गुरवेऽदात्। क्रमात्तस्या गुरुशुश्रूषाभावनाप्रकर्षात् क्षपकश्रेण्यारोहात्केवलज्ञानमुत्पेदे। तथापि गुरुवैयावृत्यान्न निवृत्ता। यावद्धि गुरुणा न ज्ञातं[5] यदयं केवलीति तावत् पूर्वप्रयुक्तं विनयं केवल्यपि नात्येति। सापि यद्यद्गुरोरुचितं रुचितं च तत्तदन्नादि सम्पादितवती। अन्यदा वर्षत्यब्दे सा पिण्डमाहरद्। गुरुभिरभिहितम्—वत्से! श्रुतज्ञाऽसि, किमिति वृष्टौ त्वयाऽऽनीतः पिण्डः? 15 इति। साऽभाणीद्—भगवन्! यत्राध्वनि अप्कायोऽचित्त एवासीत्तेनैवायासिषमहम्; कुतः प्रायश्चित्तापत्तिः?। गुरुराह—छद्मस्थः कथमेतद्वेद?। तयोचे केवलं ममास्ति। ततो मिथ्या मे दुष्कृतम्; केवल्याशातित इति ब्रुवन्नपृच्छत्तां गच्छाधिपः—किमहं सेत्स्यामि न वेति?। केवल्यूचे मा कृढ्वमधृतिम्; गङ्गामुत्तरतां वो भविष्यति केवलम्। ततो गङ्गामुत्तरीतुं लोकैः सह नावमारोहत्सूरिः। यत्र यत्र स न्यषीदत्तत्र तत्र नौर्मंक्तुमारेभे। तदनु मध्यदेशासीने मुनीने सर्वापि नौर्मंक्तुं लग्ना। ततो लोकैः सूरिर्जले क्षिप्तः। दुर्भगीकरणविराद्धया प्राग्भवपत्न्या व्यन्तरीभूतयाऽन्तर्जलं शूले निहितः। 20 शूलप्रोतोऽप्ययम[6]प्कायजीवविराधनामेवा[7]शोचयन्नाऽऽत्मपीडाम्। क्षपकश्रेण्यारूढोऽन्तकृत्केवलीभूय सिद्धः। आसन्नैः सुरैस्तस्य निर्वाणमहिमा चक्रे। अत एव तत्तीर्थं प्रयाग इति जगति पप्रथे। प्रकृष्टो यागः पूजा अत्रेति प्रयाग [8]इत्यन्वर्थः। शूलाप्रोतत्वगतानुगतिकतया चाद्यापि परसमयिनः क्रकचं स्वाङ्गे दापयन्ति तत्र। वटश्च तत्र गणशस्तुरुष्कैश्छिन्नोऽपि मुहुर्मुहुः प्ररोहति।

सूरेः करोटिर्यादोभिस्त्रोट्यमानाऽपि जलोर्मिभिर्नदीतीरं नीता। इतस्ततो लुलन्ती च शुक्तिवन्नदीतटे क्वापि गुप्त-25 विषमे प्रदेशे विलग्य तस्थौ। तस्य च करोटिकर्परस्यान्तः कदाचित्पाटलाबीजं न्यपप्तत्। क्रमात् करोटिकर्परं भित्त्वा दक्षिणहनोः पाटलातरुरुद्गतो विशालश्चायमजनि। तदत्र पाटलिद्रोः प्रभावाच्चाष[9]निमित्ताच्च नगरं निवेश्यताम्, आशिवाशब्दं च सूत्रं दीयताम्। ततो राज्ञाऽऽदिष्टा नैमित्तिकाः पाटलां पूर्वतः कृत्वा पश्चिमाम्, तत उत्तराम्, ततः पुनः पूर्वाम्, ततो दक्षिणां शिवाशब्दाऽवधि गत्वा [10]सूत्रमपातयन्। एवं चतुरस्रः पुरस्य सन्निवेशो बभूव। तत्राङ्किते प्रदेशे पुरमचीकरन्नृपः। तच्च पाटला[11]नाम्ना पाटलिपुत्रं पत्तनमासीत्। असमकुसुमबहुलतया च कुसुमपुरमित्यपि 30 रूढम्। तन्मध्ये श्रीनेमिचैत्यं राज्ञाऽकारि। तत्र पुरे गजाश्वरथशालाप्रासादसौधप्राकारगोपुरपण्यशालासत्राकारपौषधागाररम्ये चिरं राज्यं जैनधर्मं चापालयदुदायिनरेन्द्रः।

तस्मिन्नुपात्तपौषधेऽन्यदोदायिमारकेण स्वर्गातिथ्यं प्रापिते नापितगणिकासुतो नन्दः श्रीवीरमोक्षात्षष्टिवत्सर्यामतीतायां क्षितिपतिरजनि। तदन्वये सप्त नन्दा नृपा जाताः। नवमनन्दे राजनि परमार्हतकल्पकान्वयी शकटालो

1 P प्रतिदिशं। 2 B नारकाः। 3 P नास्ति 'तु'। 4 B दिक्षा°। 5 P ज्ञानं। 6 B °ऽप्यप्काय°। 7 B °विराधनाशोच°। 8 'इत्यन्वर्थः' नास्ति A B D आदर्शे। 9 P चाप°। 10 A B C नास्ति 'सूत्र'। 11 A 'पाडली'; P 'पाटली'।

मभ्यभूत् । तस्य पुत्रौ **स्थूलभद्र-श्रियकौ**; सप्त च पुत्र्यः-**यक्षा-यक्षदत्ता-भूता-भूतदत्ता-एणा-रेणा-वेणा**ख्याः क्रमादेकादिसप्तान्तवार[1]श्रुतपाठिन्योऽजनिषत ।

तत्रैव पुरे **कोशा** वेश्या, तज्जामिरुप**कोशा** चाभूताम् ।

तत्रैव च **चाणिक्यः**[2] सचिवो **नन्दं** समूलमुन्मूल्य **मौर्यवंश्यं श्रीचन्द्रगुप्तं** न्यवीविशद्विशांपतित्वे । तद्वंशे तु **बिन्दुसारोऽशोकश्रीः कुणाल**[3]स्तत्सूनुस्त्रिखण्ड**भरता**धिपः परमार्हतोऽनार्यदेशेष्वपि प्रवर्तितश्रमण-विहारः **सम्प्रति**महाराजश्चाभवत् । 5

मूलदेवः सकलकलाकलापज्ञः, **अचल**सार्थवाहो महाधनी, **देवदत्ता** च गाणिक्यमाणिक्यं तत्रैव प्रागवसन् ।

उमास्वातिवाचकश्च **कौभीषणि**गोत्रः **पञ्चशतसंस्कृतप्रकरण**प्रसिद्धस्तत्रैव **तत्त्वार्थाधिगमं** सभाष्यं व्यरचयत् । चतुरशीतिर्वादशालाश्च तत्रैव विदुषां परितोषाय पर्यणंसिषुः ।

तत्रैव चोत्तुङ्गतरङ्गोत्संगितगगनाङ्गणा परिवहति महानदी **गङ्गा** । 10

तस्यैव चोत्तरा[4]दिशि विपुलं वालुकास्थलं नातिदूरे, यत्रारूढ **कल्की प्रातिपदाचार्य**प्रमुखसंघश्च सलिलप्लवान्निस्तरीता ।

तत्रैव च भविष्यति **कल्कि**नृपतिर्**धर्मदत्त-जितशत्रु-मेघघोषा**दयश्च तद्वंश्याः ।

तत्रैव च विद्यन्तेऽन्तर्निहित**नन्द**सत्कनवनवतिद्रव्यकोट्यः, पञ्च स्तूपाः, येषु धनधनायया श्री**लक्षणावती**सुरत्राणस्तांस्तानुपाक्रमतोपक्रमांस्ते च तत्सैन्योपप्लवायैवाकल्पन्त । 15

तत्रैव विहृतवन्तः श्री**भद्रबाहु-महागिरि-सुहस्ति-वज्रस्वा**म्यादयो युगप्रवरागमाः । विहरिष्यन्ति च **प्रातिपदा**चार्यादयः ।

तत्रैव महाधन**धनश्रेष्ठि**नन्दना **रुक्मिणी** श्री**वज्रस्वामि**नं पतीयन्ती प्रतिबोध्य तेन भगवता निर्लोभ**चूडा**मणिना प्रव्राजिता ।

तत्रैव **सुदर्शन**श्रेष्ठिमहर्षि**रभया**राज्ञ्या व्यन्तरीभूतया भूयस्तरमुपसर्गितोऽपि न क्षोभमभजत् । 20

तत्रैव **स्थूलभद्र**महामुनिः षड्रसाहारपरः **कोशा**याश्चित्रशालायामुत्सादितमदन[5]मदश्चकार वर्षारात्रचतुर्मासीम् । सिंहगुहावासिमुनिरपि तं स्पर्द्धिष्णुस्तत्रैव **कोशया** तदानीतरत्नकम्बलस्य चन्दनिकाप्रक्षेपेण प्रतिबोध्य पुनश्चारुतरां चरणश्रियमङ्गीकारितः ।

तत्रैव द्वादशाब्दे दुर्भिक्षे गच्छे देशान्तरं प्रतिप्रोषिते सति **सुस्थिताचार्य**शिष्यौ क्षुल्लकावदृशीकरणाञ्जनाक्तचक्षुषौ **चन्द्रगुप्त**नृपतिना सह बुभुजाते कियन्त्यपि दिनानि । तदनु गुरुप्रत्युपालम्भाद् **विष्णुगुप्त** एव तयोर्निर्वाहमकरोत् । 25

तत्रैव च श्री**वज्रस्वामी** पौरस्त्रीजनमनःसंक्षोभरक्षणार्थं प्रथमदिने सामान्यमेव रूपं विकृत्य, द्वितीयेऽह्नि चाहो ! नास्य भगवतो गुणानुरूपं रूपमिति देशनारसहृतहृदयजनमुखात् सँल्लापान् श्रुत्वाऽनेकलब्धिमान् सहजमप्रतिरूपं रूपं विकुर्व्य सौवर्णे सहस्रपत्रे निषद्य देशनां विधाय राजादिजनताममोदयत् ।

तस्यैव पुरस्य मध्ये सप्रभावातिशया मातृदेवता आसंस्तदनुभावात्तत्पुरं परैराग्रहवद्भिरपि न खलु ग्रहीतुमशाकि । **चाणिक्य**वचसोत्पाटिते पुनर्जनैर्मातृमण्डले गृहीतवन्तौ **चन्द्रगुप्त-पर्वतकौ** । एवमाद्यनेकसंविधानकनिधाने तत्र नगरेऽष्टादशसु विद्यासु स्मृतिषु पुराणेषु च द्वासप्ततौ कलासु **भरत-वात्सायन-चाणाक्य**लक्षणे रत्नत्रये मन्त्र-यन्त्र- 30

---

1 B °श्रुति । 2 P C चाणक्यः । 3 B D Pa कुणालसूनु° । 4 P उत्तरदिशि । 5 'मदन' नास्ति B C ।

तन्त्रविद्यासु रसवाद-धातु-निधिवादाञ्जन-गुटिका-पादप्रलेप-रत्नपरीक्षा-वास्तुविद्या-पुं-स्त्री-गजाश्ववृषभादिलक्षणेन्द्रजालादिग्र-न्थेषु काव्येषु च नैपुणचणास्ते ते पुरुषाः प्रत्यूषः प्रत्यूषकीर्तनीयनामधेयाः[1]।

आर्यरक्षितोऽपि हि चतुर्दशविद्यास्थानानि तत्रैवाधीत्य **दशपुर**मागमत्। आढ्यास्तु तत्रैवंविधा वसन्ति स्म, ये योजनसहस्रगमने यानि गजपदानि भवेयुस्तानि प्रत्येकं स्वर्णसहस्रेण पूरयितुमीशते। अन्ये च तिलानामाढक उप्ते 5 प्ररूढे सुफलिते यावन्तस्तिलाः स्युस्तावन्ति हेमसहस्राणि बिभ्रति गृहे। अपरे च घनागमप्रवहद्गिरिनदीवारिपूरस्यैकदि-नोत्पन्नेन गवां नवनीतेन संवरं विरचय्य पयोरयं स्खलयितुमलम्। अन्यतमे चैकाहजातजात्यनवकिशोराणां समुद्धृतैः स्कन्धकेशैः **पाटलिपुत्रं** समन्ताद्वेष्टयितुमचेष्टन्त। इतरे च शालिरत्नद्वयं वेश्मनि बिभरांबभूवुस्तत्रैकशालिर्भिन्नभिन्न-शालिबीजप्रसूतिमान्, अन्यश्च गर्द्दभिकाशालिर्यो लूनलूनः पुनः पुनः फलति।

गौडदेशावतंसस्य श्री**जिनप्रभ**सूरयः। कल्पं **पाटलिपुत्र**स्य रचयां चक्रुरागमात्॥ १॥

10 **॥ इति श्रीपाटलिपुत्रपुरकल्पः॥**

॥ ग्रं० १२५; अ० १९॥

---

३७. श्रावस्तीनगरीकल्पः।

दुहसरितारणवत्थी **सावत्थी** सयलसुक्खपसवत्थी। नमिऊण **संभवजिणं** तीसे किंचेमि[2] कप्पलवं॥ १॥

अत्थि[3] इहेव दाहिणड्ढ**भारहे वासे** अगणिज्जगुणगणविसए **कुणाला**विसए **सावत्थी** नाम नयरी संप-15 इकाले **महेठि**[4]त्ति रूढा वट्टइ[5]। जत्थ अज्जवि घणगहणवणमज्झट्ठियं सिरि**संभवनाह**पडिमाविभूसियं गयणग्ग-लग्गसिहरं पासट्ठियजिणबिंबमंडियदेवउलियाअलंकरियं जिणभवणं चिट्ठइ पायारपरियरियं। तस्स चेइयस्स दुवारअदू-र[6]सामंते विल्लिरउल्लसिर[7]अतुल्लपल्लवसिणिद्धच्छाओ महल्लसाहाभिरामो रत्तासोअपायवो दीसइ। तस्स य जिणभवणस्स पओलीए जे कवाडसंपुडा[8] आसि ते **माणिभद्द**जक्खाणुभावाओ सूरिए अत्थमुविंते सयमेव लग्गंति म्ह; उदिए य दिणयरे सयमेव उग्घडंति म्ह। अन्नया कलिकालदुल्ललिअवसेण **अल्लावदीण**सुरत्ताणस्स मलिक्केण **हब्बस**नाम-20 गेणं **बहडाइच**नगराओ आगंतूण पायारभित्ति-कवाडाइं कइवयबिंबाणि अ भग्गाणि। मंदप्पभावा हि भवंति दूस-माए अहिट्ठायगा। तहा तस्सेव चेइयस्स सिहरे जत्तागयसंघेणं कीरमाणे ण्हवणाइमहूसवे आगंतूण एगो चित्तगो उववसिइ। न य कस्स वि भयं जणेइ। जाव मंगलपईवे कए सट्ठाणमुवगच्छइ त्ति।

इत्थेव नयरीए बुद्धाययणं चिट्ठइ जत्थ **समुद्दवंसीया करावल्ल**[9]नरिंदकुलसंभूया रायाणो **बुद्ध**भत्ता अज्ज वि नियदेवयस्स पुरओ महग्घमुल्लं पल्लाणियं अलंकियं विभूसिअं महातुरंगमं ढोअंति।

25 जंगुलीविज्जा य इत्थेव **बुद्धेण** ससंपदाया पयासिया महप्पभावा।

इत्थेव निप्पज्जंति नाणाविहा साली; जेसिं सव्वसालिजाइण इक्किक्के कणंमि निक्खिप्पमाणे[10] आसिहं भरि-ज्जइ महंतं खोरयं।

इत्थेव भयवं **संभव**सामी चवण-जम्मण-निक्खमण-केवलनाणुप्पत्तिकल्लाणगाइं ससुरासुर-नर-भवणमणरंज-णाइं अकारि।

30 **कोसंबीपुरी**ए उप्पण्णो **जियसत्तु**निवसचिव**कासव**पुत्तो **जक्खा**[11]कुक्खिसंभूओ **कविलो** महरिसी

---

1 P मानधियः। 2 B कप्पेमि। 3 P नास्ति 'अत्थि'। 4 B महिठि; D महठि। 5 P विहाय नास्त्यन्यत्र 'वट्टइ'। 6 P नास्ति 'अदूर'। 7 B D °उल्लसिरं। 8 C °संपुडा। 9 C करावल°; P करवेल्ल°। 10 P °माणा। 11 D P जसा°।

जणयंमि विवन्ने विज्जाअहिज्जणत्थं एयं नयरिं[1] समागओ पिउमित्तइंददत्तउवज्झायसयासे सालिभद्दइब्भदा-सन्नेडीवयणेणं दोमाससुवण्णकए वच्चंतो कमेण सयंबुद्धो जाओ। पडिबोहिऊण पंचसयचोरे सिद्धो अ।

इत्थेव तिंदुगुज्जाणे पंचसयसमण-अज्जिआसहस्सपरिवुडो पढमनिन्हवो जमाली ठिओ। ढंकेण कुंभया-रेण पढमं नियसालासंठिआ भगवओ धूआ पिअदंसणा अज्जा साडियाए[2] एगदेसे अंगारं छोढूण 'कयमाणे कडि'त्ति वीरवयणं पडिवज्जाविया। तीए य सेससाहुणी साहुणो पडिबोहिया सामिं चेव अल्लीणा। एगो चेव 5 जमाली विपडिवन्नो ठिओ।

इत्थेव तिंदुगुज्जाणे केसीकुमारसमणो गणहरो भयवया गोअमसामिणा कुट्ठयउज्जाणाओ आगं-तूण परुप्परं संवायं च काउं पंचजामं धम्ममंगीकारिओ।

इत्थेव एगं वासारत्तं समणो भयवं महावीरो ठिओ खंडपडिमाए; सक्केण य पूइओ चित्तं तवोकम्ममकासी।

इत्थेव जियसत्तु-धारिणीपुत्तो खंदगायरिओ उप्पन्नो जो पंचसयसीससहिओ पालगेणं कुंभयार- 10 कडनयरे जंतेण पीलिओ।

इत्थेव [3]जियसत्तुरायपुत्तो भद्दो नाम पव्वइत्ता पडिमं पडिवन्नो विहरंतो वेरज्जे[4] संपत्तो चोरिउ त्ति काऊण गहिओ रायपुरिसेहिं तच्छियंगो खारं दाउं कक्खडदब्भेहिं वेढिओ मुक्को सिद्धो अ।

जहा रायगिहाइसु तहा इत्थवि नयरीए बंभदत्तस्स हिंडी जाया।

इत्थेव खुड्डगकुमारो अजियसेणायरियसीसो जणणीमयहरिया-आयरिय-उज्झायनिमित्तं बारसबारसवरि- 15 साणि दव्वओ सामण्णे ठिओ। नट्टविहीए 'सुट्ठु गाइयं सुट्ठु वाइय'मिच्चाइ गीइयं सोउं जुवराय-सत्थवाह-भज्जा-मंत-मिंठेहिं समं पडिबुद्धो।

एवमाईणं अणेगेसिं संविहाणगरयणाणं उप्पत्तीए एसा नयरी रोहणगिरिभूमि त्ति।

सावत्थिमहातित्थस्स कप्पमेयं पढंतु विउसवरा। जिणपवयणभत्तीए इय भणइ जिणप्पहो सूरी॥ १॥

॥ इति श्रीश्रावस्तीनगरीकल्पः समाप्तः॥ 20

॥ ग्रं० ४२ ॥

---

1 P नयरं। 2 P साडियाएग°। 3 C जय°। 4 D वेरग्गे।

३८. वाराणसीनगरीकल्पः ।

नत्वा तत्त्वाख्यायिनं **श्रीसुपार्श्वं** श्री**पार्श्वं** च न्यञ्चितानिम्नविघ्नम् ।
वाराणस्यास्तीर्थरत्नस्य कल्पं जल्पामः सत्कल्पनापोढकल्पम् ॥ १ ॥

अस्त्यत्रैव दक्षिणे **भारतार्धे** मध्यमखण्डे **काशि**जनपदालङ्कृतिरुत्तरवाहिन्या त्रिदशवाहिन्याऽलङ्कृतधनकनक-
5 रत्नसमृद्धा **वाराणसी** नाम नगरी गरीयसामद्भुतानां निधानम् । **वरणा**नाम्नी सरिद**ऽसि**नाम्नी च द्वे अपि सरिता-
वस्यां **गङ्गा**मनुप्रविष्टे इति **वाराणसी**ति नैरुक्तं नामास्याः प्रसिद्धम् ।

अस्यां सप्तमो जिनसत्तमः श्रीमान् **सुपार्श्वे**[1] ऐक्ष्वाकुप्रतिष्ठ**महीपति**महिष्याः **पृथ्वी**देव्याः कुक्षाववतीर्य
जन्ममुपादित । त्रिभुवनजनवादितयशःपटहः स्वस्तिकलाञ्छितद्विशतधनुरुच्छ्रायकाञ्चनच्छायकायः, क्रमेण प्राज्यराज्य-
श्रियमनुभूय भूयः सांवत्सरिकं दानं प्रदाय, सहश्राम्रवणे दीक्षां च कक्षीकृत्य, विहृत्य छद्मस्थावस्थया नवमासीं केवल-
10 ममलमासाद्य **संमेतगिरि**मेत्य निर्वृतः ।

त्रयोविंशश्च जिनेशः श्री**पार्श्वनाथ** ऐक्ष्वाका**श्वसेन**[2]रसेनसूनु**र्वामा**कुक्षिसम्भवः पन्नगलक्ष्म्या नवकरोच्छ्राय-
नीलच्छविवपुरात्तजन्मा**श्रमपदो**द्याने कौमार एवोपात्तचारित्रभारः केवलमुत्पाद्य तस्मिन्नेव शैले शैलेसीमवाप्य सिद्धः ।
अस्यामेव कुमारकाले भगवानेष एव **मणिकर्णिकायां** पञ्चाग्नितपस्तप्यमानात्**कमठ**र्षेरायतौ भाविनीं विपदमा-
त्मनो विविदिवानप्यन्तर्दारुणज्वलनज्वालाभिरर्धदग्धं दन्दशूकं जनन्या जनानां च संदर्श्य कुपथमथनमकार्षीत् ।

15 अस्यां काश्यपगोत्रौ चतुर्वेदौ षट्कर्मकर्मठौ समृद्धौ यमलभ्रातरौ **जयघोष-विजयघोषा**भिधानौ द्विजवराव-
भूताम् । एकदा **जयघोषः** स्नातुं गङ्गामगात् । तत्र पृदाकुणा[3] ग्रस्यमानं भेकमेकमालोकयत् । सर्पं च कुललेनो-
त्क्षिप्य भूमौ पातितमद्राक्षीत् । सर्पमाक्रम्य स्थितं [4]कुललम् । तमेव चण्डग्रासैः[5] खादन्तं सर्पं च कुललवशगतमपि चीत्कु-
र्वाणमण्डूकभक्षिणं[6] वीक्ष्य प्रतिबुद्धः । प्रव्रज्य क्रमादेकरात्रिकीं प्रतिमां प्रपद्य विहरन् पुनरिमां नगरीमागात् । मासक्ष-
पणपारणके यज्ञपाटकं[7] प्रविष्टः । तत्र विप्रैर्भैक्षमदित्सुभिः प्रतिषिद्धः । ततः श्रुताभिहितचर्यामुपदिश्य भ्रातरं विप्रांश्च
20 प्रत्यबूबुधत् । विरक्तो **विजयघोषः** प्राव्राजीत् । द्वावपि मोक्षं प्रापतुः ।

अस्यां **नन्दा**भिधानो नाविकस्तरपण्यजिघृक्षया मुमुक्षुं **धर्मरुचिं** विराध्य, तस्य हुंकारेण भस्मीभूय, गृहको-
किल-हंस-सिंहभवान् यथासङ्ख्यं सभा-मृतगङ्गातीराञ्जनागिरिष्ववाप्य, तस्यैवानगारस्य तेजोनिसर्गेण विपद्य चास्यामेव
पुर्यां बटुर्भूत्वा, तथैव निधनमधिगत्यास्यामेव राजा समजनिष्ट । जातिस्मरः सार्धं श्लोकमकरोत् । अन्येद्युस्तत्रैवागतं
तमनगारं समस्यापूरणाद्विज्ञायाभययाचनपुरस्सरमुपगत्य च क्षमयित्वा परमार्हतोऽभूत् । सिद्धश्च **धर्मरुचिः** क्रमात् ।
25 सा चेयं समस्या—

गंगाए नाविओ **नंदो** सभाए घरकोइलो । हंसो मयंगतीराए सीहो अंजणपव्वए ॥ १ ॥
वाराणसीए बडुओ राया तत्थेव आयओ[8] । एएसिं घायगो जो उ सो इत्थेव समागओ ॥ २ ॥ इति ।

अस्यां **संवाहन**स्य नरपतेः सातिरेके कन्यासहस्रे सत्यपि परनृपतिप्तनावेष्टितायां पुरि राज्यलक्ष्मीं गर्भ-
स्थोऽप्यङ्ग**वीर**स्त्रातवान् ।

30 अस्यां मातङ्गऋषि**र्बल**नामा **मृतगङ्गा**तीरे लब्धजन्मा **तिन्दुको**द्याने स्थितवान् । गण्डी[9]तिन्दुकं च यक्षं
गुणगणैर्हृतहृदयमकार्षीत् । **कौशलिक**नृपदुहिता च **भद्रा** मलक्लिन्नाङ्गं तमृषिं विलोक्य निष्ठ्यूतवती । ततस्तेन
यक्षेणाधिष्ठिताङ्गी तेनैव मुनेर्वपुषि सङ्क्रम्य परिणीता त्यक्ता च मुनिना । ततो **रुद्रदेवेन** यज्ञपत्नी कृता । मासक्ष-

---

1 B श्रीसुपार्श्वं । 2 P °अश्वसेनसूनु° । 3 C पृदाकुदा । 4 B C कुलालं । 5 B °ग्रासैः खासैः । 6 P °भक्षणं ।
7 P यज्ञपाटं । 8 Pa C जाओ । 9 P गंठी ।

पणपारणे च भिक्षार्थमुपागतो मातङ्गमुनिर्द्विजातिभिरुपहस्य कदर्थ्यमानं तं प्रेक्ष्य **भद्र**योपलक्ष्य बोधितास्तं क्षमयामासु-र्ब्राह्मणाः । प्रत्यलाभयंश्च भक्ताद्यैर्विदधे विबुधैर्गन्धोदकवृष्टिः पुष्पवृष्टिर्दुन्दुभिवादनं वसुधारापातश्च ।

अस्यां–**वाणारसी**पकोट्टए **पासे गोवालि भद्दसेणे** य । **णंदसिरी** पउमद्दह **रायगिहे सेणिए वीरे** ॥ १ ॥
वाणारसी य नयरी अणगार**धम्मघोस-धम्मजसे** । मासस्स य पारणए गोउल गंगा य अणुकंपा ॥२॥

एतदा**वश्यकनिर्युक्ति**स्थं संविधानकद्वयमजनि । तथा हि– 5

अत्रैव पुर्यां **भद्रसेनो** जीर्णश्रेष्ठी । तस्य भार्या **नन्दा** । तयोः पुत्री **नन्दश्री**र्वरकरहिता । अत्रैव **कोष्ठके** चैत्येऽन्यदा **पार्श्वस्वामी** समवासरत् । **नन्दश्रीः** प्राव्राजीद् । **गोपाल्यार्या**याः शिष्यतयार्पिता । सा च पूर्वमुग्रं विहृत्य पश्चादवसन्नीभूता हस्तपादाद्यक्षालयत् । साध्वीभिर्धार्यमाणा तु[1] विभक्तायां वसतौ स्थिता । तदनालोच्य मृता **क्षुल्लहिमवति** पद्मद्रहे[2] **श्रीदेवी** जज्ञे देवगणिका । भगवतः श्री**वीर**स्य **राजगृहे** समवसृतस्याग्रे नाट्यविधिमुप-दर्श्य गता । अन्ये त्वाहुः–करिणीरूपेण वातनिसर्गमकरोत् । **श्रेणिकेन** तस्याः स्वरूपे पृष्टे भगवानाख्यत् तस्याः 10 पूर्वभवावसन्नतावृत्तम् ।

अत्रैव पुर्यां **धर्मघोष-धर्मयशा**सौ द्वावनगारौ वर्षारात्रमवस्थाताम् । तौ[3] मासं मासं क्षपणेनास्ताम् । अन्यदा चतुर्थपारणके तृतीयपौरुष्यां विहाराय प्रस्थितौ शारदातपेनार्तौ तृषितौ **गङ्गामुत्त**रन्तौ मनसापि नाम्भ ऐच्छतामनेषणीय-मिति । देवता तद्गुणावर्जिता गोकुलं[4] विकुर्व्य गङ्गोत्तीर्णौ तौ दध्यादिभिरुपन्यमन्त्रयन् । तौ दत्तोपयोगौ ज्ञातवन्तौ यथेयं मायेति प्रत्यषेधताम् । पुरःप्रस्थितयोस्तयोरनुकम्पया वार्द्दलं[5] व्यकार्षीद्देवता । तौ चार्द्रायां भूमौ शीतलवाताप्यायितौ 15 ग्रामं प्राप्य शुद्धोञ्छमादिषातामिति ।

श्रीम**दयोध्याया**मि**क्ष्वाकु**वंश्यः श्री**हरिश्चन्द्रो** महानरेन्द्र**स्त्रिशङ्कु**पुत्र **उशीनर**नृपसुतया **सुतारा**-देव्या **रोहिताश्वेन**[6] च पुत्रेण सहितः सुखमनुभवंश्चिरमसात्काश्यपीम् । एकदा सौधर्माधिपतिर्दिवि दिविजपरिषदि तस्य सत्त्ववर्णनामकरोत् । तदश्रद्दधानावुभौ गीर्वाणौ **चन्द्रचूड-मणिप्रभ**नामानौ वसुन्धरामवतीर्णौ । तयोरेको वन-वराहरूपं विकृत्याऽ**योध्या**परिसरस्थित**शक्रावतार**चैत्याश्रमं ससंरम्भं भङ्क्तुं प्रववृते । अन्येद्युः सदसि सिंहासन- 20 स्थितो **हरिश्चन्द्र**महीन्द्रस्तमाश्रमोपप्लवं शूकरोपज्ञं श्रुत्वा तत्र गत्वा बाणप्रहारेण तं वराहं प्रहृतवान्[7] । तस्मिंश्च सश-रेऽन्तर्हिते गर्हिततेतरचरितः स यावत्तं [8]प्रदेशमविशत्तावत्तत्र हरिणीं स्वबाणप्रहतां, तस्याः स्फुरन्तं च गलितं गर्भं निभाल्य,[9] **कपिञ्जल-कुन्तल**मित्राभ्यां सह पर्यालोच्य, भ्रूणघ्नं स्वं शोचयन् प्रायश्चित्तग्रहणार्थं कुलपतिमुपसृत्य नमस्कृत्य गृही-त्वा चाशिषं यावदास्ते; तावद् **वञ्चना**नामकुलपतिकन्यका तुमुलमतुलमकार्षीत् । व्याहार्षीच्च–तात ! अनेन पापीयसा मन्मृगी हता; तन्मरणे च[10] मम [11]मन्मातुश्च मरणं भविष्यतीति निशम्य कुपितः कुलपतिर्नृपतये । ततस्तत्पदोर्निपत्य नरपति- 25 रलपत्–प्रभो ! सकलामपि वसुधां प्रतिगृह्य मामेतस्मादेनसो मोचय; **वञ्चना**याश्च मरणनिवारणाय हेमलक्षं दास्यामीति । तेनाप्योमिति प्रतिपन्नवति **कौटल्य**मृषिं सह कृत्वा नृपः स्वपुरीमागात् । ततो **वसुभूते**र्मन्त्रिणः **कुन्तलस्य** च सुहृदस्तत्स्वरूपमावेद्य कोशान्निष्कलक्षमानाययत् । ततः स्मित्वा तापसः **सांगारको**[12] व्याकरोत्–असभ्यं जलधिमेख-लामखिलामिलां त्वमदाः । [13]ततोऽस्मदीयमेव वस्त्वसभ्यमेवं दीयत[13] इति कोऽयं न्यायः । अथ **वसुभूतिः**[14] किमपि ब्रुवाणः कुलपतिना शापादकारि कीरः; **कुन्तलस्तु**[15] शृगालः । तौ च वनमध्येऽवसताम् । राजा च मासमवधिं मार्ग- 30 यित्वा **रोहिताश्व**मङ्गुलौ लगयित्वा **सुतार**या सह **काशीं** प्रति प्राचलत् । क्रमादिमां पुरीं प्राप्य संस्थायां स्थितः । तत्र शिरसि तृणं दत्वा **वज्रहृदय**विप्रहस्ते देवीं कुमारं च हेमपट्सहस्र्या विविक्रिये[16] । सा तत्र खण्डनपेषणादि-

1 P पि । 2 P Pa पद्महृदे । 3 P तौ द्वौ । 4 P गोकुलानि । 5 P वार्द्दलकं । 6 B रोहिताख्येन । 7 B प्रहीतवान् । 8 B Pa प्रवेश° । 9 Pa निर्भाल्य । 10 B 'च' नास्ति । 11 P मम मातु° । 12 P सांगाको । 13 P ततोऽस्मदीयमेव चास्म दीयते; Pa ततोऽस्म दीयते । 14 C वसुभूतिं । 15 B कुन्तलस्य । 16 PPa विचिक्रिये ।

कर्माणि निर्ममे । दारकश्च समित्पत्रपुष्पफलाद्याजहार । राज्ञि चिन्ताचान्तचेतसि कुलपतिः कनकं मार्गयितुमगात् । दत्तं तस्मै राज्ञा काञ्चनसहस्रपट्कम् । कुलपतौ स्तोकमिति कुप्यत्यङ्गारकोऽवोचद्–भोः ! किमर्थं पत्नीमपत्यं च व्यक्रीणीथाः । अत्रत्यं **चन्द्रशेखरं** नरेश्वरं किं न याचसे वसुलक्षम् । राज्ञोक्तम्–असत्कुले नेदं सिध्यति । डोम्बस्यापि वेश्मनि कर्मकरत्वमुररीकृत्य दास्यामि तव काञ्चनलक्ष[1]मिति । ततः कर्म कर्तुं [2]प्रवृत्तश्चण्डालेन श्मशानरक्षणे नियुक्तः ।
5 ततः परं ताभ्याममराभ्यामकारि मारिः पुर्याम् । यथा भूपादेशानीतमान्त्रिकेण राक्षसीप्रवादमारोप्य **सुतारा** मण्डलमानीय रासभमारोपिता, यथा शुकः पावके दत्तझम्पोऽपि न दग्धः, यथा पितृवने वटोत्कलम्बितं नरं तटे च रुदन्तीं सुदतीं विलोक्य नराद्विद्याधरापहारवृत्तमाकर्ण्य तमुन्मोच्य तत्स्थाने **हरिश्चन्द्रः** स्वं नियुज्य होमकुण्डे[3] स्वमांसखण्डानि आर्पयत्, यथा [4]कुण्डमध्यान्मुखं निर्गतं शृगालश्चारटत्, तापसेन यथा व्रणरोहणमवनीपतेरकारि, यथा च पुष्पाणि गृह्णन् **रोहिताश्वो** निःशूकं[5] दन्दशूकेन दष्टः[6] संस्कारयितुमानीताच्च तस्मात्कण्टिकमयाचिष्ट नृपतिः, यथा[7] च सत्त्वपरीक्षानि-
10 र्वहणप्रमुदितप्रकटितनिजरूपत्रिदशकृतपुष्पवृष्टिजयजयध्वनिः सर्वजनैः प्रशंसितः सात्त्विकशिरोमणिरिति, यथा च **बहिर्मुखमुखात्** द्विराहादिपुष्पवृष्टिपर्यन्तं दिव्यमायाविलसितमवबुध्य यावच्चेतसि चमत्कृतस्तावत्स्वं स्वपुर्यां सदसि सिंहासनस्थं सपरिवारमपश्यत् । तदेतद्देवीकुमारविक्रयादि दिव्यपुष्पवर्षावसानं श्री**हरिश्चन्द्रस्य** चरित्रं सत्त्वपरीक्षानिकषोऽस्यामेव पुर्यामजनि जनजनितविस्मयम् ।

यच्च काशीमाहात्म्ये प्रथमगुणस्थानीयैरभिधीयते–यद्[8] वाराणस्यां कलियुगप्रवेशो नास्ति । तथाऽत्र प्राप्तनिधनाः
15 कीटपतङ्गभ्रमरादयः कृतानेकचतुर्विधहत्यादिपाप्मानोऽपि मनुष्यादयो वा शिवसायुज्यमिति प्रतीत्यादियुक्तिरिक्तं तदस्माभिः श्रद्धातुमपि दुःशकं किं पुनः कल्पे जल्पितुमित्युपेक्षणीयमेवैतत् ।

धातुवाद-रसवाद-खन्यवाद-मन्त्रविद्याविदुराः शब्दानुशासन-तर्क-नाटका-ऽलङ्कार-ज्योतिष-चूडामणि-निमित्तशास्त्र-साहित्यादिविद्यानिपुणाश्च पुरुषा अस्यां परिव्राजकेषु जटाधरेषु योगिषु ब्राह्मणादिचातुर्वर्ण्ये च नैके रसिकमनांसि प्रीणयन्ति । चतुर्दिगन्तदेशान्तरवास्तव्याश्चास्यां जना दृश्यन्ते सकलकलापरिकलनकौतूहलिनः ।

20 **वाराणसी** चेयं सम्प्रति चतुर्धा विभक्ता दृश्यते । तद् यथा–**देववाराणसी,** यत्र **विश्वनाथ**प्रासादः । तन्मध्ये चाश्मनं जैनचतुर्विंशतिपट्टं पूजारूढमद्यापि विद्यते । द्वितीया **राजधानी वाराणसी** यत्राद्यत्वे यवनाः । तृतीया **मदनवाराणसी;** चतुर्थी **विजयवाराणसी**ति । लौकिकानि च तीर्थानि अस्यां क इव[9] परिसंख्यातुमीश्वरः ।

अन्तर्वणं दन्तखातं[10] तडागं निकषा श्री**पार्श्वनाथस्य** चैत्यमनेकप्रतिमाविभूषितमास्ते । अस्याममलपरिमलभरा-
25 कृष्टभ्रमरकुलसङ्कुलानि सरसीषु नानाजातीयानि कमलानि ।

अस्यां च प्रतिपदमकुतोभयाः सञ्चरिष्णवो निचाय्यन्ते शाखामृगा मृगधूर्ताश्च ।

अस्याः क्रोशत्रितये **धर्मेक्षा**नामसंनिवेशो यत्र बोधिसत्त्वस्योच्चैस्तरशिखरचुम्बितगगनमायतनम् ।

अस्याश्च सार्धयोजनद्वयात्परतश्**चन्द्रावती** नाम नगरी, यस्यां श्री**चन्द्रप्रभो**र्गर्भावतारादिकल्याणिकचतुष्टयमखिलभुवनजनतुष्टिकरमजनिष्ट ।

30 गङ्गोदकेन च जिनद्वयजन्मना च प्राकाशि **काशिनगरी** न गरीयसी कैः ।
तस्या इति व्यधित कल्पमनल्पभूतेः श्रीमान् **जिनप्रभ** इति प्रथितो मुनीन्द्रः ॥ १ ॥

॥ इति श्रीवाराणसीनगरीकल्पः ॥

॥ ग्रं० ११३, अ० २३ ॥

1 Pa 'लक्ष' नास्ति । 2 'प्रवृत्तः' नास्ति Pa । 3 B होमखण्डैः । 4 BD कुण्डमुखा° । 5 P निःशूक° । 6 BPa दृष्टः । 7 P 'यथा' नास्ति । 8 B 'यद्' नास्ति । 9 B P इह । 10 P दण्डखातं ।

३९. श्रीमहावीरगणधरकल्पः ।

सिरिवीरस्स गणहरे इक्कारस जन्ममाहणे नमिउं । तेसिं चिअ कप्पलवं भणामि समयाणुसारेण ॥ १ ॥
नामं ठाणं जणया जणणीउ जम्मरिक्ख-गुत्ताइं । गिहिपरिआउ संसय-वयदिणे[1]-पुरं-देसे-काले य ॥ २ ॥
वयपरिवारो छउमत्थ-केवलित्तेसु वरिससंखा य । रूवं लद्धी[2] आउं सिवठाण तेसु त्ति दाराइं ॥ ३ ॥

१. तत्थ गणहराण नामाइं–१ **इंदभूई**, २ **अग्गिभूई**, ३ **वाउभूई**, ४ **विअत्तो**, ५ **सुहम्मसामी**, ६ **मंडिओ**, ७ **मोरिअपुत्तो**, ८ **अकंपिओ**, ९ **अचलभाया**, १० **मेअज्जो**, ११ **पभासो** य । 5

२. इंदभूइप्पमुहा तिन्नि सहोअरा **मगह**देसे **गोब्बर**गामे उप्पन्ना । विअत्तो सुहम्मो य दो वि **कोल्लाग**संनिवेसे । मंडिओ मोरिअपुत्तो अ दो वि **मोरिअ**संनिवेसे । अकंपिओ **मिहिलाए** । अयलभाया **कोसलाए** । मेअज्जो **वच्छ**देसे **तुंगिअ**संनिवेसे । पभासो **रायगिहे** ।

३. जणओ तिण्हं सोअराणं **वसुभूई** । विअत्तस्स **धणमित्तो** । अज्जसुहम्मस्स **धम्मिलो** । मंडिअस्स **धणदेवो** । मोरिअपुत्तस्स **मोरिओ** । अकंपिअस्स **देवो** । अयलभाउणो **वसू**[3] । मेअज्जस **दत्तो** । पभासस्स **बलो**[4] । 10

४. जणणी तिण्हं भाउआणं[5] **पुहवी** । विअत्तस्स **वारुणी** । सुहम्मस्स **भद्दिला** । मंडिअस्स **विजयदेवा**[6] । मोरिअपुत्तस्स सा चेव । जओ **धणदेवे** परलोअं गए **मोरिएण** सा संगहिआ; अविरोहो अ तंमि देसे । अकंपिअस्स **जयंती** । अयलभाउणो **नंदा** । मेअज्जस्स **वरुणदेवा** । पभासस्स **अइभद्द**त्ति । 15

५. नक्खत्तं–इंदभूइणो जिट्ठा, अग्गिभूइणो कित्तिआ, वाउभूइणो साई, विअत्तस्स सवणो, सुहम्मसामिणो उत्तरफग्गुणीओ, मंडिअस्स महाओ, मोरिअपुत्तस्स मिगसिरं, अकंपिअस्स उत्तरासाढा, अयलभाउणो मिगसिरं, मेअज्जस्स अस्सिणी, पभासस्स पूसु त्ति ।

६. तिण्णि भाउणो **गोअम**गुत्ता, विअत्तो **भारद्दाय**सगुत्तो, सुहम्मो **अग्गिवेसायण**सगुत्तो, मंडिओ **वासिट्ठ**सगुत्तो, मोरिअपुत्तो **कासव**गुत्तो, अकंपिओ **गोअम**सगुत्तो, अयलभाया **हारिअ**सगुत्तो, मेअज्जो पभासो अ **कोडिण्ण**सगुत्तु त्ति । 20

७. गिहत्थपरिआओ–इंदभूइणो पंचासं वासाइं, अग्गिभूइस्स छायालीसं[7], वाउभूइस्स बायालीसं, वियत्तस्स पन्नासं, सुहम्मसामिस्स वि पन्नासं, मंडियस्स तेवण्णा, मोरियपुत्तस्स पणसट्ठी, अकंपियस्स अडयालीसं, अयलभाउणो छायालीसं, मेअज्जस्स छत्तीसं, पभासस्स सोलस त्ति ।

८. संसओ–इंदभूइस्स जीवे । भगवया महावीरेणं छिन्नो । अग्गिभूइणो कम्मे । वाउभूइणो तज्जीव-तस्सरीरे । 25 विअत्तस्स पंचमहाभूएसु । सुहम्मसामिणो जो जारिसो इह भवे, परभवे वि सो तारिसो चेव त्ति । मंडिअस्स बंध-मुक्खेसु । मोरिअपुत्तस्स देवेसु । अकंपिअस्स नरएसु । अयलभाउणो पुन्न-पावेसु । मेअज्जस्स परलोए । पभासस्स निव्वाणे ति ।

९-१०-११-१२. दिक्खागहणमिक्कारसण्हं पि देवाणमागमणं दट्ठूण जणवाडयाओ उवट्ठियाणं वइसाहसुद्धइक्कारसीए, **मज्झिमपावाए** नयरीए, **महसेण**वणुज्जाणे, पुव्वण्हदेसकाले त्ति ।

१३. इंदभूइपमुहाणं पंचण्हं पंचसया खंडिआ सह निक्खंता । मंडिअ-मोरिअपुत्ताणं पत्तेअं सड्ढा तिन्निसया । 30 अकंपिआईणं चउण्हं पत्तेअं तिन्निसय त्ति ।

---

1 P संसयदिक्खा° । 2 B C Pa रिद्धी । 3 P वसुदत्तो । 4 P बलिपिया । 5 P सोयराणं । 6 मंडियस्स मोरियपुत्तस्स विजयदेवा । 7 B C बायालीसं ।

१४. छउमत्थपरिआओ–इंदभूइस्स तीसं वासाइं, अग्गिभूइस्स दुवालस, वाउभूइस्स दस, विअत्तस्स दुवालस, सुहम्मस्स बायालीसं, मंडिअ-मोरिअपुत्ताणं पत्तेअं चउद्दस, अकंपिअस्स नव, अयलभाउणो दुवालस, मेअज्जस्स दस, पभासस्स अट्ठ त्ति ।

१५. केवलिविहारेणं–इंदभूई दुवालसवासाइं विहरिओ । अग्गिभूई सोलस, वाउभूई विअत्तो अ पत्तेयं अट्ठा-
5 रस, अज्जसुहम्मस्स अट्ठ, मंडिअ-मोरिअपुत्ताणं पत्तेअं सोलस, अकंपिअस्स एगवीसं, अयलभाउणो चउद्दस, मेअज्जस्स पभासस्स य पत्तेयं सोलस त्ति ।

१७. इक्कारसण्ह वि वज्जरिसहनारायं संघयणं, समचउरंसं संठाणं, कणगप्पहो देहवण्णो । रूवसंपया पुण तेसिं एवं तित्थयराणं

'सबसुरा जइ रूवं अंगुट्ठपमाणयं विउविज्जा । जिणपायंगुट्ठं पइ न सोहए तं जहिंगालो ॥'

10 त्ति वयणाओ अप्पडिरूवं रूवं[1] । तओ किंचूणं गणहराणं । तत्तो वि हीणं आहारगसरीरस्स । तत्तो वि अणुत्तर-सुराणं । तत्तो जहक्कमं नवमगेविज्जगपज्जवसाणदेवाणं हीणयरं । तत्तो वि कमेण अच्चुआइसोहम्मंतदेवाणं हीणयरं । तत्तो वि भवणवईणं, तत्तो वि जोइसिआणं, तत्तो वि वंतरदेवाणं, तत्तो वि चक्कवट्टीणं हीणयरं । तत्तो वि अद्धचक्क-वट्टीणं, तत्तो वि बलदेवाणं हीणयरं । तत्तो वि सेसजणाणं छट्ठाणवडिअं । एवं विसिट्ठं रूवं गणहराणं ।

सुअं पुण–अगारवासे चउद्दसविज्जाठाणाइं; सामण्णे पुण दुवालसंगं गणिपिडगं सबेसिं । जओ सबे वि दुवा-
15 लसंगप्पणेआरो ।

१७. लद्धीओ पुण–सबेसिं गणहराणं सबाओ वि हवंति । तं जहा–बुद्धिलद्धी अट्ठारसविहा[2]–केवलनाणं, ओहिनाणं, मणपज्जवनाणं, बीअबुद्धी, कुट्ठबुद्धी, पयाणुसारित्तं, संभिन्नसोइत्तं, दूरासायण[3]सामत्थं, दूरफरिसणसामत्थं, दूरदरिसणसामत्थं, दूरग्घाणसामत्थं, दूरसवणसामत्थं, दसपुवित्तं, चउदसपुवित्तं, अट्ठंगमहानिमित्तकोसल्लं, पण्णासव-णत्तं, पत्तेअबुद्धत्तं, वाइत्तं च ।

20 किरियाविसया लद्धी दुविहा–चारणत्तं, आगासगामित्तं च ।

वेउविअलद्धी अणेगविहा–अणिमा, महिमा, लघिमा, गरिमा, पत्ती, पकामित्तं, ईसित्तं, वसित्तं, अप्पडिघाओ, अंतद्धाणं, कामरूवित्तमिच्चाइ ।

तवाइसयलद्धी सत्तविहा–उग्गतवत्तं, दित्ततवत्तं, महातवत्तं, घोरतवत्तं, घोरपरक्कमत्तं, घोरबंभयारित्तं, अघोरगुणबंभयारित्तं च ।

25 बललद्धी तिविहा–मणोबलित्तं, वयणबलित्तं, कायबलित्तं ।

ओसहिलद्धी अट्ठविहा–आमोसहिलद्धी, खेलोसहिलद्धी, जल्लोसहिलद्धी, मलोसहिलद्धी, विप्पोसहिलद्धी, सबो-सहिलद्धी, आसगअविसत्तं, दिट्ठिअविसत्तं ।

रसलद्धी छविहा–वयणविसत्तं, दिट्ठिविसत्तं, खीरासवित्तं, महुआसवित्तं, सप्पिरासवित्तं, अमिआसवित्तं ।

खित्तलद्धी दुविहा पण्णत्ता–अक्खीणमहाणसत्तं, अक्खीणमहालयत्तं च ।

30 –एयाहिं लद्धीहिं संपन्ना सबे वि ।

१८. सबाउअं–इंदभूइस्स बाणउई संवच्छराइं । अग्गिभूइस्स चउहत्तरी, वाउभूइस्स सत्तरी, विअत्तस्स असीई, अज्जसुहम्मस्स सयं, मंडिअस्स तेआसीई, मोरिअपुत्तस्स पंचनउई, अकंपियस्स अट्ठहत्तरी, अयलभाउणो बाहत्तरी[4], मेअज्जस्स बासट्ठी, पहासस्स चालीसं ति ।

---

1 Pa °रूपं रूपं । 2 D °विज्जा । 3 Pa C °सामण° । 4 Pa बाहुत्तरी ।

१९-२०. निव्वाणं च सव्वेसिं पाओवगमणमासिअभत्तेण, **रायगिहे** नयरे, **वेभार**पव्वए संजायं। पढम-पंचमवज्जा नवगणहरा जीवंते भयवंतम्मि वीरे मुक्खं पत्ता। इंदभूई अज्जसुहम्मो अ तम्मि निव्वाणगए निव्वुअ त्ति।

गोअमसामिप्पभिई[1] गणपहुणो [2]पवयणंबवणमहुणो। सुगहीअनामधेया महोदयं मज्झ उवणिंतु॥ १॥

जो गणहरकप्पमिणं पइपच्चूसं पढे पसन्नमणो। करयलमहिवसइ सया कल्लाणपरंपरा तस्स॥ २॥

जिणपहसूरिहि कओ **गह-वसु-सिहि-कु**-मिअ**विक्कम**समासु। 5

जिट्ठसिअपंचमिबुहे गणहरकप्पो चिरं जयइ॥ ३॥

॥ इति श्रीमहावीरगणधरकल्पः॥

॥ ग्रं० ६८॥

४०. कोकावसतिपार्श्वनाथकल्पः।

नमिऊण **पास**नाहं **पउमावइ-नागराय**कयसेवं। **कोकावसहीपास**स्स किंपि वत्तव्वयं भणिमो॥ १॥10

सिरि**पण्हवाहण**कुलसंभूओ **हरिसउरीय**गच्छालंकारभूसिओ **अभयदेव**सूरी **हरिसउरा**ओ एगया गामाणुगामं विहरंतो सिरि**अणहिल्ल**वाडय[3]पट्टणमागओ। ठिओ बाहिपएसे सपरिवारो। अन्नया सिरि**जयसिंह**-देवनरिंदेण[4] गयखंधारूढेण रायवाडिआगएण दिट्ठो मलमलिणवत्थदेहो। राइणा गयखंधाओ उयरिऊण †वंदिऊण दुक्करकारओ त्ति दिन्नं **मलधारि** त्ति नामं। अब्भत्थिऊण† नयरमज्झे नीओ रण्णा। दिन्नो उवस्सओ **घयवसही**-समीवे। तत्थ ठिआ सूरिणो। तस्स पट्टे कालक्कमेणं [5]अणेगगंथनिम्माणविक्खायकित्ती सिरि**हेमचंद**सूरी संजाओ[6]।15 ते अ पइदिअहं वासारत्तचउम्मासीए **घयवसहीए** गंतूण वक्खाणं करिंति। अन्नया कस्सवि **घयवसही**[7]गुट्ठि-यस्स पिउकज्जे बलिवित्थाराइकरणं **घयवसही**चेइए आढत्तं। तओ वक्खाणकरणत्थमागया सिरि**हेमचंदसूरी** पडिसिद्धा गुट्ठिएहिं जहा—अज्ज वक्खाणं इत्थ न कायव्वं। इत्थ बलिमंडणाइणा नत्थि ओगासो[8]। तओ सूरीहिं भणिअं—थोवमेव अज्ज वक्खाणिस्सामो; मा चउमासीवक्खाणविच्छेओ भविस्सइ त्ति। तं च न पडिवन्नं गुट्ठिएहिं। तओ अमरिसविलक्खमाणसा पडिआगया उवस्सयमायरिआ। तओ दूमिअचित्ते गुरुणो नाऊण सोवन्निअ**मोग्वदेव-नायग**-20 नामगेहिं सड्ढेहिं मा अन्नयावि परचेइए एवंविहो अवमाणो होउ त्ति **घयवसही**समीवे चेइयकारावणत्थं भूमी मग्गिआ, न य कत्थ वि लद्धा। तओ **कोकओ** नाम सिट्ठी भूमिं मग्गिओ। वारिओ अ सो **घयवसही**गुट्ठिएहिं तिउणदम्मदाणपइच्छणेण[9]। तओ ससंघा आगया सूरिणो **कोकय**स्स घरं। तेण वि पडिवत्तिं काऊण भणिअं—दिन्ना मए भूमी जहोचिअमुल्लेण, परं मज्झ नामेणं चेइयं कारेअव्वं। तओ सूरीहिं सावएहिं अ तह त्ति[10] पडिवन्नं। तत्थ य **घयवसही**आसन्नं कारिअं चेइयं[11] **कोकावसहि** त्ति। ठाविओ तत्थ सिरि**पास**नाहो। पूइज्जइ तिकालं।25

कालक्कमेण सिरि**भीमदेव**रज्जे पट्टणं भंजंतेण मालवरण्णा सा **पासनाह**पडिमा वि भग्गा। तओ सोवन्निअ-**नायग**संताणुप्पन्नेहिं **रामदेव-आसधर**[12]सिट्ठीहिं उद्धारो करिउमाढत्तो। **आरासणा**उ फलहीतिगं आणीअं; न य तं निद्दोसं। तओ बिंबतिगे वि घडिए न परितोसो संजाओ गुरूणं सावयाणं च। तओ **रामदेवेण** अभिग्गहो गहिओ, जहाहं अकाराविअ **पास**सामिबिंबं न भुंजामि त्ति। गुरुणो वि उववासे कुणंति म्ह। तओ अट्ठमोववासे

1 P °प्पमुहा। 2 D पवयणोववण°; P Pa पवयणं च वण°। 3 Pa °पाडय°। 4 P °देवेण। † एतन्मध्यगता पङ्क्तिः पतिता P आदर्शे। 5 P अणेय°। 6 B Pa C संजायो। 7 B Pa C °वसहीए। 8 P पएसो। 9 P C D °दाणइच्छणेण। 10 B तहित्ति। 11 Pa B C नास्ति 'चेइयं'। 12 B Pa आसाधर।

रामदेवस्स देवादेसो जाओ। जहा–जत्थ गोहलिआ[1] सपुप्फक्खया दीसइ, तस्स हिट्ठा, इत्थेव चेइअपरिसरे इत्ति-एहिं हत्थेहिं फलही चिट्ठइ त्ति। खणिऊण लद्धा फलही[2]। कारिअं [3]निरुवमरूवं **पासनाहबिम्बं**। **बारससय [4]छासट्ठे विक्कम्मसंवच्छरे देवाणंदसूरी**हिं पइट्ठिअं। ठाविअं च चेइए। पसिद्धं च **कोकापासनाहु** त्ति। **रामदेव**स्स पुत्ता **तिहुणा जाजा** नामाणो। **तिहुणाग**स्स पुत्तो **मल्लओ**। तस्स पुत्ता **देल्हण-जइतसीह**
5 नामधेया, ते अ पूअंति पइदिणं पासनाहं।

अन्नया **देल्हण**स्स सिरि**संखेसरपास**नाहेण सुमिणयं दिन्नं। जहा–पहाए घडियाचउक्कं जाव अहं **कोकापासनाह**पडिमाए सन्निहिस्सामि। तंमि घडिआचउक्के एगंमि बिंबे पूइए किर अहं पूइओ त्ति। तहेव लोगेहिं पूइज्जमाणो **कोकापासनाहो** पूरेइ **संखेसरपास**नाहु व पच्चए। **संखेसरपासनाह**विसया पूआ[5]-जत्ताइ-अभिग्गहा तत्थेव पुरिज्जंति जणाणं। एवं संनिहिअपाडिहेरो जाओ भयवं **कोकयपासनाहो** तित्तीसपव्वपमाण-
10 मुत्ती **मलधारि**गच्छपडिबद्धो।

अणहिलपट्टणमंडणसिरि**कोकावसहिपासनाह**स्स। इअ एस कप्पलेसो होउ जणाणं धुअकिलेसो॥ १॥

॥ इति श्रीकोकावसतिपार्श्वनाथकल्पः॥

॥ ग्रं० ४०॥

---

४१. कोटिशिलातीर्थकल्पः।

नमिअ जिणे उवजीविअ वक्काइं पुव्वपुरिससीहाणं। **कोडिसिलाए** कप्पं **जिणपह**सूरी पयासेइ॥ १॥
15 इह **भरह**खित्तमज्झे तित्थं **मगहा**सु अत्थि **कोडिसिला**। अज्ज वि जं पूइज्जइ चारण-सुर-असुर-जक्खेहिं॥ २॥
भरहद्धवासिणीहिं अहिट्ठियादेवयाहिं जा सययं। जोअणमेगं पिहुला जोअणमेगं च उस्सेहो॥ ३॥
तिक्खंडपुहविपइणो निअं परिक्खंति बाहुबलमखिला। उप्पाडिअ जं हरिणो सुरनरखयराण पच्चक्खं॥ ४॥
पढमेण कया छत्तं बीएणं पाविआ सिरं जाव। तइएणं गीवाए तओ चउत्थेण वच्छथले[6]॥ ५॥
उअरंतं पंचमएण तह य छट्ठेण कडियडं[7] नीआ। ऊरूपज्जंतं[8] सत्तमेण[9] उप्पाडिआ हरिणा॥ ६॥
20 जाणूसु अट्ठमेणं नीआ चउरंगुलं तु भूमीओ। उद्धरिआ चरमेणं कन्हेणं वामबाहाए॥ ७॥
अवसप्पिणिकालवसा कमेण हायंति माणवबलाइं। तित्थयराणं तु बलं सव्वेसिं होइ इगरूवं॥ ८॥
उप्पाडेउं तीरइ जं बलवंतीए सुहडकोडीए। तेणेसा[10] कोडिसिला इक्केणावि हरिणा उ॥ ९॥
चक्काउहोत्ति नामेण **संतिनाह**स्स गणहरो पढमो। काऊण अणसणविहिं कोडिसिलाए सिवं पत्तो॥ १०॥
सिरि**संतिनाह**तित्थे संखिज्जाओ मुणीण कोडीओ। इत्थेव य सिद्धाओ एवं सिरि**कुंथु**तित्थे वि॥ ११॥
25 **अर**जिणवरतित्थंमि वि बारससिद्धाओ समणकोडीओ। छक्कोडीओ रिसीणं सिद्धाओ **मल्लि**जिणतित्थे॥ १२॥
मुणिसुव्वयजिणतित्थे सिद्धाओ तिन्नि साहुकोडीओ। इक्का कोडी सिद्धा **नमि**जिणतित्थेऽणगाराणं॥ १३॥
अन्ने वि अणेगे तत्थ महरिसी सासयं पयं पत्ता। इह कोडिसिलातित्थं विक्खायं पुहविवलयंमि[11]॥ १४॥

पुव्वायरिएहिं च इत्थ सविसेसं किं पि भणियं। तं जहा–

जोअणपिहुला यामा **दसन्नपव्वय**समीवि कोडिसिला। जिणछक्कतित्थसिद्धा तत्थ अणेगाउ मुणिकोडी॥ १५॥

---

1 B गोअलिआ। 2 C पणही। 3 C निरुपम°। 4 C बासट्ठे। 5 P नास्ति 'पूआ'; B Pa पूजा। 6 Pa वच्छयले; B वत्थयले। 7 Pa कडिअं नीया; B कडिअ नीयाऊ। 8 Pa D °पज्जंते। 9 B सत्तमो। 10 B C तेणं सा। 11 B वलयंति।

पढमं **संति**गणहरो **चक्काउहो**ऽणेगसाहुपरिअरिओ । [1]बत्तीसजुगेहिं तओ सिद्धा संखिज्जमुणिकोडी ॥ १६ ॥
संखिज्जा मुणिकोडी अडवीसजुगेहिं **कुंथु**नाहस्स । **अर**जिणचउवीसजुगा बारसकोडीओ सिद्धाओ ॥ १७ ॥
मल्लिस्स वि वीसजुगा छकोडि. **मुणिसुव्वय**स्स कोडितिगं । **नमि**तित्थे इगकोडी सिद्धा तेणेस कोडिसिला ॥१८॥
छत्ते सिरंमि गीवा वच्छे उअरे कडीइ ऊरूसु । जाणू कहमवि जाणू नीया सा वासुदेवेण ॥ १९ ॥
इअ **कोडिसिलातित्थं** तिहुअणजणजणिअनिव्वुआवत्थं । सुरनरखेअरमहिअं भवियाणं कुणउ कल्लाणं ॥ २० ॥ 5

॥ **इति श्रीकोटिशिलातीर्थकल्पः** ॥

॥ ग्रं० २४, अ० ६ ॥

---

४२. वस्तुपाल-तेजःपालमन्त्रिकल्पः ।

*श्री**वस्तुपाल-तेजःपालौ** मन्त्रीश्वरावुभावास्ताम् । यौ भ्रातरौ प्रसिद्धौ कीर्तनसंख्यां तयोर्ब्रूमः ॥ १ ॥*

पूर्वं **गूर्जर**धरित्रीमण्डनायां **मण्डली**महानगर्यां श्री**वस्तुपाल-तेजःपाला**द्या वसन्ति स्म । अन्यदा श्री**म-** 10
त्पत्तनवास्तव्य**प्राग्वाटान्वय**ठक्कुरश्री**चण्डपा**त्मज[2] ठक्कुरश्री[3]**चण्डप्रसादा**ङ्गज मन्त्रिश्री**सोम**कुलावतंस ठक्कुरश्री-
आसराजनन्दनौ **कुमारदेवी**कुक्षिसरोवरराजहंसौ श्री**वस्तुपाल-तेजःपालौ** श्री**शत्रुञ्जय-गिरिनारा**दितीर्थयात्रायै प्रस्थितौ । **हडाला**ग्रामं गत्वा यावत्स्वां विभूतिं[4] चिन्तयतस्तावल्लक्षत्रयं सर्वस्वं जातम् । ततः **सुराष्ट्रा**स्वसौ-
स्थ्यमाकलय्य लक्षमेकमवन्यां निधातुं निशीथे महाऽश्वत्थतलं खानयामासतुः । तयोः खानयतोः कस्यापि प्राक्तनः
कनकपूर्णः शौल्वकलशो निरगात् । तमादाय श्री**वस्तुपालस्तेजःपाल**जायाम**नुपमादेवीं** मान्यतयाऽपृच्छत्– 15
कैतन्निधीयत ? इति । तयोक्तम्–गिरिशिखर एवैतदुच्चैः स्थाप्यते यथा प्रस्तुतनिधिवन्नान्यसाद्भवति । तच्छ्रुत्वा श्री**व-
स्तुपाल**स्तद् द्रव्यं श्री**शत्रुञ्जयोज्जयन्ता**दावव्ययत् । कृतयात्रो व्यावृत्तो **धवलक्कक**पुरमगात् ।

अत्रान्तरे **महणदेवी** नाम **कन्यकुब्जे**श्वरसुता, [या] जनकात् कञ्चुलिकापदे **गूर्जर**धरित्रीमवाप्य तदाधिपत्यं
भुक्त्वा मृता सती तत्रैव देशाधिष्ठात्री देवता समजनि । सैकदा स्वप्ने **वीरधवल**नृपस्याचीकथत्–यद्व**स्तुपाल-तेजः-
पालौ** राज्यचिन्तकप्राग्रहरौ विधाय सुखेन राज्यं शाधि । इत्थं कृते राज्य-राष्ट्रवृद्धिस्तव भवित्री–इत्यादिश्य स्वं च 20
प्रकाश्य तिरोदधे देवी । प्रातरुत्थाय नृपतिर्**वस्तुपाल-तेजःपाला**वाहूय सत्कृत्य च ज्यायसः **स्तम्भतीर्थ-धव-
लक्क**योराधिपत्यमदात् । **तेजःपाल**स्य तु सर्वराज्यव्यापारमुद्रां ददौ । ततस्तौ षड्दर्शनदान-नानाविधधर्मस्थानविधाप-
नादिभिः सुकृतशतानि चिन्वन्तौ निन्यतुः समयम् ।

तथा हि–लक्षमेकं सपादं जिनबिम्बानां कारितम् । अष्टादश कोट्यः षण्णवतिर्लक्षाः श्री**शत्रुञ्जय**तीर्थे द्रविणं
व्ययितम् । द्वादश कोट्योऽशीतिलक्षाः श्री **उज्जयन्ते** । द्वादशकोट्यस्त्रिपञ्चाशल्लक्षा **अर्बुद**शिखरे **लूणिगवसत्याम्** । 25
नवशतानि चतुरशीतिश्च पौषधशालाः कारिताः । पञ्चशतानि दन्तमयसिंहासनानाम्, पञ्चशतानि पञ्चोत्तराणि
समवसरणानां जादरमयानाम् । ब्रह्मशालाः सप्तशतानि सप्तदशानि । सत्राकाराणां सप्तशती । तपस्वि-कापालिकमठानां
सर्वेषां भोजननिर्वापादिदानं कृतम् । त्रिंशच्छतानि द्व्युत्तराणि माहेश्वरायतनानाम् । त्रयोदशशतानि चतुरुत्तराणि
शिखरबद्धजैनप्रासादानाम् । त्रयोविंशतिः शतानि जैनचैत्योद्धाराणाम् । अष्टादशकोटिसुवर्णव्ययेन सरस्वतीभाण्डागाराणां
स्थानत्रये भरणं कृतम् । पञ्चशती ब्राह्मणानां नित्यं वेदपाठं करोति स्म । वर्षमध्ये संघपूजात्रितयम् । पञ्चदशशती 30

---

1 Pa छत्तीस° । 2 Pa नास्ति; B चन्द्रपात्मज । 3 B चन्द्रप्रसा° । 4 C 'विभूतिं' नास्ति ।

श्रमणानां गृहे नित्यं विहरति स्म। तटिक-कार्पटिकानां सहस्रं साधिकं प्रत्यहमभुङ्क्त। त्रयोदश तीर्थयात्राः संघपतीभूय कृताः। तत्र प्रथमयात्रायां चत्वारि सहस्राणि पञ्चशतानि शकटानां सशय्यापालकानां, सप्तशती सुखासनानां, अष्टादशशती वाहिनीनां, एकोनविंशतिः शतानि श्रीकरीणां, एकविंशतिः शतानि श्वेताम्बराणां, एकादशशती दिगम्बराणां, चत्वारि शतानि सार्धानि जैनगायनानां, त्रयस्त्रिंशच्छती बन्दिजनानां, चतुरशीतिस्तडागाः सुबद्धाः, चतुःशती
5 चतुःषष्ट्यधिका वापीनां, पाषाणमयानि त्रिंशद्-द्वात्रिंशद्दुर्गाणि, दन्तमयजैनरथानां चतुर्विंशतिः, विंशं शतं शाकघटितानां, सरस्वतीकण्ठाभरणादीनि चतुर्विंशतिर्विरुदानि श्री**वस्तुपालस्य**। चतुःषष्टिर्मसीतयः कारिताः। दक्षिणस्यां **श्रीपर्वतं** यावत्, पश्चिमायां **प्रभासं** यावत्, उत्तरस्यां **केदारं** यावत्, पूर्वस्यां **वाराणसीं** यावत् तयोः कीर्तनानि। सर्वाग्रेण त्रीणि कोटिशतानि चतुर्दश लक्षा अष्टादश सहस्राणि अष्टशतानि लोष्टिकत्रितयोनानि द्रव्यव्ययः। त्रिषष्टिवारान् संग्रामे जैत्रपत्रं गृहीतम्। अष्टादश वर्षाणि तयोर्व्यापृतिः।

10 एवं तयोः पुण्यकृत्यानि कुर्वतोः कियताऽपि कालेन श्री**वीरधवल**नृपः कालधर्ममवापत्[1]। ततस्तत्पट्टे तदीयस्तनयः श्रीमान् **वीसलदेव**स्ताभ्यां मन्त्रिप्रवराभ्यां राज्येऽभिषिक्तः। सोऽपि समर्थः सन् क्रमेण दुर्मदः सचिवान्तरं विधाय मन्त्रि**तेजःपाल**मपाचकार। तदवलोक्य राज्ञः पुरोधाः **सोमेश्वर**नामा महाकविर्नृपमुद्दिश्य साक्षेपं नव्यं काव्यमपठत्। तथा–

मासान्मांसलपाटलापरिमलव्यालोलतोलम्बतः प्राप्य प्रौढिमिमां समीर महतीं पश्य त्वया यत्कृतम्।
15 सूर्याचन्द्रमसौ निरस्ततमसौ दूरं तिरस्कृत्य यत् पादस्पर्शसहं विहायसि रजः स्थाने तयोः स्थापितम्॥ १॥

इत्यादि। तयोः पुरुषरत्नयोर्वृत्तशेषमादित उत्पत्तिस्वरूपं च लोकप्रसिद्धित एवावगन्तव्यम्।

गीताद्गायनवर्येण **सूडा**द्विज्ञाय कीर्तिता। कीर्तनानामियं संख्या श्रीमतोर्मन्त्रिमुख्ययोः॥ १॥
यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते। अर्हन्तश्च तयोश्चित्तमध्यवात्सुरहर्निशम्॥ २॥
तत्तीर्थरूपयोर्युक्त्या पुरुषश्रेष्ठयोस्तयोः। कीर्तनोत्कीर्तनेनापि न्याय्या कल्पकृतिर्न किम्॥ ३॥
20 इत्यालोच्य हृदा कल्पलेशं मन्त्रीशयोस्तयोः। एतं विरचयां चक्रुः श्री**जिनप्रभ**सूरयः॥ ४॥

॥ श्रीमहामात्यवस्तुपालतेजःपालकीर्तनसंख्याकल्पः॥

॥ ग्रं० ५३, अ० ६॥

---

1 C अगात्।

४३. ढिंपुरीतीर्थकल्पः ।

श्रीपार्श्वं[1] **चेल्लणा**भिख्यं ध्यात्वा श्री**वीर**मप्यथ । कल्पं श्री**ढिंपुरी**[2]तीर्थस्याभिधास्ये यथाश्रुतम् ॥ १ ॥

पारेतजनपदान्त**श्चर्मणवत्या**स्तटे महानद्याः । नानाघनवनगहना[3] जयत्यसौ **ढिंपुरी**ति पुरी ॥ २ ॥

अत्रैव **भारते** वर्षे **विमलयशा** नाम भूपतिरभूत् । तस्य **सुमङ्गला**देव्या सह विषयसुखमनुभवतः क्रमाज्जातमपत्ययुगलम् । तत्र पुत्रः **पुष्पचूलः**, पुत्री **पुष्पचूला** । अनर्थसार्थमुत्पादयतः **पुष्पचूलस्य** कृतं लोके- 5 **वङ्कचूल** इति नाम । महाजनोपालब्धेन[4] राज्ञा रुषितेन निःसारितो नगराद् **वङ्कचूलः** । गच्छंश्च पथि पतितो भीषणायामटव्यां सह निजपरिजनेन स्वस्रा च स्नेहवशया । तत्र च क्षुत्पिपासार्दितो दृष्टो भिल्लैः । नीतः स्वपल्लीम्, स्थापितश्च पूर्वपल्लीपतिपदे पर्यपालयद्राज्यम्, अलुण्टयद्ग्रामनगरसार्थादीन् ।

अन्यदा **सुस्थिताचार्या अर्बुदा**चलाद**ष्टापद**यात्रायै प्रस्थितास्तामेव **सिंहगुहा**नामपल्लीं सगच्छाः प्रापुः । जातश्च वर्षाकालः; अजनि च पृथ्वी जीवाकुला । साधुभिः सहालोच्य मार्गयित्वा **वङ्कचूला**द्वसतिं स्थितास्तत्रैव 10 सूरयः । तेन च प्रथममेव व्यवस्था कृता–मम सीमान्तर्धर्मकथा न कथनीया । यतो युष्मत्कथायामहिंसादिको धर्मः; न चैवं मल्लोको निर्वहति । एवमस्तु इति प्रतिपद्य तस्थुरुपाश्रये गुरवः । तेन चाहूय सर्वे प्रधानपुरुषा भणिताः–अहं राजपुत्रस्ततो मत्समीपे ब्राह्मणादय आगमिष्यन्ति । ततो भवद्भिर्जीववधो मांसमद्यादिप्रसङ्गश्च पल्ल्या मध्ये न कर्तव्यः । एवं च कृते यतीनामपि भक्तपानमजुगुप्सितं कल्पत इति । तैस्तथैव कृतं यावच्चतुरो मासान् । प्राप्तो विहारसमयः । अनुज्ञापितो **वङ्कचूलः** सूरिभिः–'समणाणं सउणाण'मित्यादि वाक्यैः । ततस्तैः सह चलितो **वङ्कचूलः** । स्वसीमां 15 प्रापुषा तेन विज्ञप्तम्[5]–वयं परकीयसीमायां न प्रविशाम इति । भणितः सूरिभिः–वयं सीमान्तरमुपेताः, तत्किमुपदिशामस्तुभ्यम् ? । तेनोक्तम्–यन्मयि निर्वहति, तदुपदेशेनानुगृह्यतामयं जनः । ततः सूरिभिश्चत्वारो नियमा दत्तास्तद्यथा– अज्ञातफलानि न भोक्तव्यानि, सप्ताष्टानि पदान्यपसृत्य घातो देयः । पट्टदेवी नाभिगन्तव्या । काकमांसं च न भक्षणीयमिति । प्रतिपन्नाश्च[6] तेन ते । गुरून् प्रणम्य स स्वगृहानागमत् ।

अन्यदा गतः सार्थस्योपरि धाट्या । शकुनकारणान्नागतः सार्थः । त्रुटितं च तस्य पथ्यदनम् । पीडिताः क्षुधा 20 राजन्याः । दृष्टश्च तैः किंपाकतरुः फलितः । गृहीतानि फलानि । न जानन्ति ते तन्नामधेयमिति तेन न भुक्तानि । इतरैः सर्वैर्बुभुजिरे । मृताश्च तैः किंपाकफलैः । ततश्चिन्तितं तेनाहो ! नियमानां फलम् । तत एकाक्येवागतः पल्लीम् । रजन्यां प्रविष्टः स्वगृहम् । दृष्टा **पुष्पचूला** दीपालोकेन पुरुषवेषा निजपत्न्या सह प्रसुप्ता । जातस्तस्य कोपस्तयोरुपरि । द्वावप्येतौ खड्गप्रहारेण छिनद्मीति यावदचिन्तयत्तावत्स्मृतो नियमः । ततः सप्ताष्टपदान्यपक्रम्य घातं ददत्[7] खाट्कृतमुपरि खड्गेन । व्याहृतं स्वस्रा 'जीवतु **वङ्कचूल**' इति तद्वचः श्रुत्वा लज्जितोऽसावपृच्छत् किमेतदिति ? । सापि 25 [8]नटवृत्तान्तमचीकथत् ।

कालक्रमेण तस्य तद्राज्यं शासतस्तत्रैव पल्ल्यां तस्यैवाचार्यस्य शिष्यौ **धर्मऋषि-धर्मदत्त**नामानौ कदाचिद्वर्षारात्रमवास्थिषाताम् । तत्र तयोरेकः साधुस्त्रिमासक्षपणं विदधे । द्वितीयश्चतुर्मासक्षपणम् । **वङ्कचूल**स्तु तद्व्रतनियमानामायतिशुभ[9]फलतामवलोक्य व्यजिज्ञपत्–भदन्तौ ! मदनुकम्पया कमपि पेशलं धर्मोपदेशं दत्तम् । ततस्ताभ्यां चैत्यविधापनदेशना क्लेशनाशिनी विदधे । तेनापि **शराविका**पर्वतसमीपवर्तिन्यां तस्यामेव पल्ल्यां **चर्मणवती**सरित्तीरे 30 कारितमुच्चैस्तरं चारुचैत्यम् । स्थापितं तत्र श्रीमन्**महावीर**बिम्बम् । तीर्थतया च रूढं तत् । तत्र यान्ति स्म चतुर्दिग्भ्यः सङ्घाः ।

---

1 Pa पार्श्व° । 2 Pa °पुर° । 3 Pa °बहना । 4 Pa °पलब्धेन । 5 Pa विज्ञप्ति । 6 Pa प्रपन्नास्तेन । 7 B ददात् । 8 B तद् । 9 Pa °फलशुभता° ।

कालान्तरे कश्चिन्नैगमः सभार्यः सर्वर्द्ध्या तद्यात्रायै प्रस्थितः । प्राप्तः क्रमेण **रन्तिन**दीम् । नावमारूढौ च दम्पती चैत्यशिखरं व्यलोकयताम् । ततः सरभसं सौवर्णकच्चोलके कुङ्कुमचन्दनकर्पूरं प्रक्षिप्य जले[1] क्षेप्तुमारब्धवती नैगमगृहिणी । प्रमादान्निपतितं तदन्तर्जलतलम् । ततो भणितं वणिजा–अहो ! इदं कच्चोलकं नैककोटिमूल्यरत्नखचितं राज्ञा ग्रहणकेऽर्पितमासीत् । ततो राज्ञः कथं छुटितव्यमिति चिरं विषद्य **वङ्कचूल**स्य पल्लीपतेर्विज्ञापितं तत् ।
5 यथाऽस्य राजकीयवस्तुनो विचितिः कार्यताम् । तेनापि धीवर आदिष्टस्तच्छोधयितुं प्राविशदन्तर्नदम् । विचिन्वता चान्तर्जलतलं दृष्टं तेन हिरण्मयरथस्थं जीवन्तस्वामिश्री**पार्श्वनाथ**बिम्बम् । यावत्पश्यति स्म स बिम्बस्य हृदये तत्कच्चोलकम् । धीवरेणोक्तम्–धन्याविमौ दम्पती यद्भगवतो वक्षसि घुसृणचन्दनविलेपनार्हे स्थितमिदम् । ततो गृहीत्वा तदर्पितं नैगमस्य । तेनापि दत्तं तस्मै बहुद्रव्यम् । उक्तं च बिम्बस्वरूपं नाविकेन । ततो **वङ्कचूले**न श्रद्धालुना तमेव प्रवेश्य निष्काशितं तद्बिम्बम् । कनकरथस्तु तत्रैव मुक्तः । निवेदितं हि स्वप्ने प्राग् भगवता[2] नृपतेः, यत्र
10 क्षिप्ता सती पुष्पमाला गत्वा तिष्ठति तत्र बिम्बं शोध्यमिति । तदनुसारेण बिम्बमानीय समर्पितं राज्ञे **वङ्कचूलाय** । तेनापि स्थापितं श्री**वीर**स्य बिम्बस्य बहिर्मण्डपे यावत्किल नव्यं[3] चैत्यमस्मै कारयामीत्यभिसन्धिमता । कारिते च[4] चैत्यान्तरे यावत्तत्र स्थापनार्थमुत्थापयितुमारभन्ते राजकीयाः पुरुषास्तावत्तद्बिम्बं नोत्तिष्ठति स्म । देवताधिष्ठानात्तत्रैव स्थितमद्यापि तथैवास्ते । धीवरेण पुनर्विज्ञप्तः पल्लीपतिः–यत्तत्र देव ! मया नद्यां प्रविष्टेन बिम्बान्तरमपि दृष्टम्, तदपि बहिरानेतुमौचितीमञ्चति । पूजारूढं हि भवति । ततः पल्लीश्वरेण पृष्टा स्वपरिषत्–भो ! जानीते कोऽप्यनयोर्बिम्बयोः
15 संविधानकम् ? । केन खल्वेते नद्यान्तर्जलतले[5] [6]न्यस्ते ? । इत्याकर्ण्यैकेन पुराविदा स्थविरेण विज्ञप्तम्–देवैकस्मिन्नगरे पूर्वं नृपतिरासीत् । स च परचक्रेण समुपेयुषा सार्द्धं योद्धुं सकलचमूसमूहसन्नहनेन गतः । तस्याग्रमहिषी च निजं सर्वस्वमेतच्च बिम्बद्वयं कनकरथस्थं विधाय जलदुर्गमिति कृत्वा **चर्मणवत्यां** कोटिंबके प्रक्षिप्य स्थिता[7] । चिरं युद्ध्यतस्तस्य कोऽपि खलः किल वार्तामानैषीत्–यदयं नृपतिस्तेन परचक्राधिपतिनृपतिना व्यापादित इति । [8]तच्छ्रुत्वा देवी तत्कोटिंबकमाक्रम्यान्तर्जलतलं प्राक्षिपत् । स्वयं च परासुतामासदत् । स च नृपतिः परचक्रं निर्जित्य यावन्निजनगरमा-
20 गमत् तावद् देव्याः प्राचीनं वृत्तमाकर्ण्य भवाद्विरक्तः पारमेश्वरीं दीक्षां कक्षीचक्रे । तत्रैकं बिम्बं देवेन बहिरानीतं पूज्यमानं चास्ति । द्वितीयमपि चेन्निःसरति तदोपक्रम्यतामिति । तदाकर्ण्य **वङ्कचूलः** परमार्हत[9]चूडामणिस्तमेव धीवरं तदानयनाय नद्यां प्रावीविशत् । स च तद्बिम्बं कटीदघ्नवपुर्जलतलेऽवतिष्ठमानं बहिस्थशेषाङ्गं चावलोक्य निष्काशनोपायाननेकानकार्षीत् । न च तन्निर्गतमिति दैवतप्रभावमाकलय्य समागत्य च विशामीशाय न्यवेदयत्तत्स्वरूपम् । अद्यापि तत्किल तथैवास्ते । श्रूयतेऽद्यापि केनापि धीवरस्थविरेण नौकास्तम्भे जाते तत्कारणं विचिन्वता तस्य [10]हिरण्मयरथस्य
25 कीलिका लब्धा । तां कनकमयीं दृष्ट्वा लुब्धेन तेन व्यचिन्ति–यदिमं रथं क्रमात्सर्वं गृहीत्वा ऋद्धिमान् भविष्यामीति । ततश्च स रात्रौ निद्रां न लेभे । उक्तश्च केनाप्यदृष्टपुरुषेण–यदिमां तत्रैव विमुच्य सुखं[11] स्वेयाः, नो चेत्सद्य एव त्वां हनिष्यामीति । तेन भयार्तेन तत्रैव मुक्ता युगकीलिका इत्यादि । किं न सम्भाव्यते दैवताधिष्ठितेषु पदार्थेषु ।

श्रूयते च, सम्प्रति काले कश्चिन्म्लेच्छः पाषाणपाणिः श्री**पार्श्वनाथ**प्रतिमां भङ्क्तुमुपस्थितः स्तम्भितबाहुर्जातः । महति पूजाविधौ कृते सज्जतामापन्न इति । श्री**वीर**बिम्बं महत्तदपेक्षया लघीयस्तरं श्री**पार्श्वनाथ**बिम्बमिति**महावीर**-
30 स्वार्भकरूपोऽयं देव इति मेदा**श्चेल्लण** इत्याख्यां प्राचीकशन् । श्रीम**च्चेल्लणदेव**स्य महीयस्तममाहात्म्यनिधेः पुरस्ताभ्यां महर्षिभ्यां सुवर्णमुकुटमन्त्राम्नायः समा[रा]धितः प्रकाशितश्च भव्येभ्यः । सा च **सिंहगुहा**पल्ली कालक्रमा**ड्डिंपुरी**त्याख्यया प्रसिद्धा नगरी संजाता । अद्यापि स भगवान् श्री**महावीरः** स **चेल्लणपार्श्वनाथः** सकलसंघेन तस्यामेव पुर्यां यात्रोत्सवैराराध्येते इति ।

---

1 Pb C जलं । 2 Pa-b भवगता । 3 B नान्यं । 4 B नास्ति 'च' । 5 Pa °जलं । 6 B न्यासे । 7 Pa स्थितासीत् । 8 B 'तत्' नास्ति । 9 B Pa परमार्हतः चूलामणि° । 10 B हि रथस्य । 11 Pa नास्ति 'सुखं' ।

अन्यदा **वङ्कचूल** उज्जयिन्यां खात्रपातनाय चौर्यवृत्त्या कस्यापि श्रेष्ठिनः सद्मनि गतः । कोलाहलं श्रुत्वा [1]वलितः । ततो **देवदत्ताया** गणिकाया गाणिक्यमाणिक्यभूताया गृहं प्राविशन् । दृष्टा सा कुष्ठिना सह प्रसुप्ता । ततो निःसृत्य गतः पुरः श्रेष्ठिनो वेश्म । तत्रैकविंशोपको लेख्यके त्रुट्यतीति परुषवाग्भिर्निर्भर्त्स्य निःसारितो गेहात् पुत्रः श्रेष्ठिना । विरराम च यामिनी । यावद्राजकुलं यामीत्यचिन्तयत्, तावदुज्जगाम धामनिधिः । पल्लीशश्च निःसृत्य नगरा-द्गोधां गृहीत्वा तरुतले दिनं नीत्वा पुना रात्रावागात् । राजभाण्डागाराद्बहिर्गोधापुच्छे विलग्य प्राविशत्कोशम् । दृष्टो 5 राजाग्रमहिष्या रुष्टया, पृष्टश्च कस्त्वमिति । तेनोचे चौर इति । तयोक्तम्—मा भैषीः, मया सह सङ्गमं कुरु । सोऽवादीत्—का त्वम् ? । साऽप्यूचेऽग्रमहिष्यहमिति । चौरोऽवादीद्यद्येवं तर्हि ममाम्बा भवसि, अतो यामीति निश्चिते तया स्वाङ्गं नखैर्विदार्य पूत्कृतिपूर्वमाहूता आरक्षकाः । गृहीतस्तैः । राज्ञा चानुनयार्थमागतेन तद्दृष्टम् । राज्ञोक्ताः स्वपौ(पु)रुषाः—मैनं गाढं कुर्वीध्वमिति । ते रक्षितः । प्रातः पृष्टः क्षितिभृता । तेनाप्युक्तम्—देव ! चौर्यायाहं प्रविष्टः । पश्चाद्देवभा-ण्डागारे देव्या दृष्टोऽस्मि । यावदन्यन्न कथयति तावत्तुष्टो विदितवेद्यो नरेन्द्रः स्वीकृतः पुत्रतया, स्थापितश्च सामन्त- 10 पदे । देवी च विडम्ब्यमाना रक्षिता **वङ्कचूलेन** । अहो ! नियमानां शुभफलमित्यनवरतमयमध्यासीत् । प्रेषितश्चान्यदा राज्ञा **कामरूप**भूपसाधनार्थम् । गतो युद्धे । घातैर्जर्जरितो विजित्य तमागमत् स्वस्थानम् । न्याहूता च राज्ञा वैद्याः । यावद्गाढोऽपि घातव्रणो विकसति । तैरुक्तम्—देव ! काकमांसेन शोभनो भवत्ययम् । तस्य च **जिनदास**श्रावकेण सार्द्धं प्रागेव मैत्र्यमासीत् । ततस्तदानयनाय प्रेषितः पुरुषः पुरुषाधिपतिना, येन तद्वाक्यात्काकमांसं भक्षयतीति । तदाहूतश्च **जिनदासो** ऽ**वन्ती**मागच्छन्शुभे दिव्ये सुदत्यौ रुदत्यावद्राक्षीत् । तेन पृष्टे—किं रुदिथः ? । ताभ्या- 15 मुक्तम्—अस्माकं भर्ता सौधर्माच्च्युतः । अतो राजपुत्रं **वङ्कचूलं** प्रार्थयावहे । परं त्वयि गते स[2] मांसं भक्षयिता ततो गन्ता दुर्गतिं तेन रुदिवः । तेनोक्तम्—तथा करिष्ये यथा तन्न भक्षयिता । गतश्च तत्र । राजोपरोधाद्वङ्कचूलमवोचत्—गृहाण बलिभुक्पिशितम् । पटूभूतः सन् प्रायश्चित्तं चरेः । **वङ्कचूलो**ऽवोचत्—जानासि त्वं यदाचर्याप्यकार्यं प्रायश्चित्तं ग्राह्यम्, ततः प्रागेव तदनाचरणं श्रेय इति । 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ।' इति वाक्यान्निषिद्धो नृपतिः । विशेषप्रतिपन्ननिवहश्चाऽच्युतकल्पमगमत् । वलमानेन **जिनदासे**न ते देव्यौ तथैव रुदत्यौ दृष्ट्वा प्रोक्तम्— 20 किमिति रुदिथः ? । न तावत्स मांसं ग्राहितः । ताभ्यामभिदधे-स अधिकाराधनावशादच्युतं प्राप्तस्ततो नाऽभवदस्म-द्भर्तेति । एवं जिनधर्मप्रभावं सुचिरं परिभाव्य **जिनदासः** स्वावासमाससादेति । एवं चास्य निर्मापयिता **वङ्कचूल** एवाजनि जनितजगदानन्दः ॥

ढिंपुरीतीर्थरत्नस्य कल्पमेतं यथाश्रुतम् । किञ्चिद्विरचयां चक्रुः श्री**जिनप्रभ**सूरयः ॥ १ ॥

॥ इति श्रीचेल्लणपार्श्वनाथस्य कल्पः ॥

॥ ग्रं० ११६, अ० २१ ॥

---

1 B चलितः । 2 D 'स' नास्ति ।

४४. ढिंपुरीस्तवः[†] ।

उत्तुङ्गैर्विविधैर्नगैरुपलसच्छायैरभिभ्राजिता,
श्री**वीर**प्रभु**पार्श्व-सुव्रत-युगादी**शादिबिम्बैर्युता ।
पल्ली भूतलविश्रुता नियमिनः श्री**वङ्कचूल**स्य या,
5 सा भूत्वा चिरमद्भुतां कलयतु प्रौढिं पुरी **ढिंपुरी** ॥ १ ॥
व्योमचुम्बिशिखरं मनोहरं **रन्तिदेव**[1]तटिनीतटस्थितम् ।
अत्र चैत्यमवलोक्य यात्रिकाः शैत्यमाशु ददति स्वचक्षुषोः ॥ २ ॥
मूलनायक इहान्त्यजिनेन्द्रश्चारुलेपघटितोद्भटमूर्तिः ।
दक्षिणे जयति **चेल्लणपार्श्वो** भात्युदक् तदपरः फणिकेतुः ॥ ३ ॥
10 एकत **आदिजिनो** वृजिनो ऽतोऽन्यत्र[2] पुन**र्मुनिसुव्रत**नाथः ।
[3]एवमनेकजिनेश्वरमूर्तिः स्फूर्तिमदभ्रचकास्ति जिनौकः[4] ॥ ४ ॥
अत्रा**म्बिका** द्वारसमीपवर्तिनी श्री**क्षेत्रपालो** भुजषट्कभास्वरः ।
सर्वज्ञपादाम्बुजसेवना[5]ऽलिनौ संघस्य विघ्नौघमपोहतः क्षणात् ॥ ५ ॥
यात्रोत्सवानिह[6] शितौ [7]महसो दशम्यामालोक्य लोकसमवाय[8]विधीयमानान् ।
15 संभावयन्ति भविकाः कलिकालगेहे प्राघूर्णकं कृतयुगं ध्रुवमभ्युपेतम् ॥ ६ ॥
अमरमहितमेतत् तीर्थमाराध्य भक्त्या, फलितसकलकामाः सर्वभीतीर्जयन्ति ।
बहलपरिमलाढ्यं चन्दनं प्राप्य यद्वा क इव सहतु तापव्यापमालिङ्गिताङ्गम् ॥ ७ ॥
वन्द्या नन्द्यादघहतिदृढा **ढिंपुरी**तीर्थरत्नम्,
यामध्यास्ते सुरतरुरिव प्रार्थितार्थप्रदायी ।
20 **पद्मावत्या** भुजगपतिना चाविमुक्तांह्रिपार्श्वः,
कायोत्सर्गस्थित[9]वपुरयं **चेल्लणः पार्श्वनाथः** ॥ ८ ॥
शशधरहृषीकाक्षिक्षोणीमिते (१२५१) शकवत्सरे,
गृहमणिमहे संघान्वीता उपेत्य पुरीमिमाम् ।
मुदितमनसस्तीर्थस्यास्य प्रभावमहोदधे-
25 रिति विरचयां चक्रुः स्तोत्रं **जिनप्रभ**सूरयः ॥ ९ ॥

॥ इति ढिंपुरीस्तोत्रम् ॥

॥ ग्रं० १६ ॥

---

† Pa C ढिंपुरीस्तवस्तवयम् । 1 B रन्तिदेवकीर्तितटिनी° । 2 Pa नान्यात्र । 3 Pa एक° । 4 C जनौकः ॥
5 Pa °केशाना° । 6 C यात्रोत्सवानिहि । 7 B Pa सहसो । 8 Pa समवायि° । 9 Pa स्थिति° ।

४५. चतुरशीतिमहातीर्थनामसङ्ग्रहकल्पः ।

पर्युपास्य परमेष्ठिपञ्चकं कीर्तयामि कृतपापनिग्रहम् ।
तत्रवेदि[1]विदितं चतुर्युताशीतितीर्थजिननामसंग्रहम् ॥ १ ॥

तथा हि–श्री**शत्रुञ्जये** भुवनदीपः श्री**वैरस्वामि**प्रतिष्ठितः श्री**आदिनाथः**[2] । तथा, श्रीमूलनायकः **पाण्डव**स्थापितो[3] नन्दिवर्धनयुगादिनाथः । श्री**शान्ति**प्रतिष्ठितः **पुण्डरीकः** श्री**कलशः**, द्वितीयस्तु[4] श्री**वैर-स्वामि**प्रतिष्ठितः **पूर्णकलशः** । सुधाकुण्डजीवितस्वामी श्री**शान्ति**नाथः । **मरुदेवा**स्वामिनी प्रथमसिद्धः ।

श्री**उज्जयन्ते** पुण्यकलश-मदनमूर्तिः श्री**नेमिनाथः** । **काञ्चनबलानके** अमृतनिधिः श्री**अरिष्ट-नेमिः** । **पापामठे** अतीतचतुर्विंशतिमध्यात् अष्टौ पुण्यनिधयः श्री**नेमीश्वरा**दयः ।

१. काशहृदे[5] त्रिभुवनमङ्गलकलशः श्रीआदिनाथः । **पारकर**देशे श्रीआदिनाथः । **अयोध्यायां** श्रीऋषभदेवः । **कोल्लापुरे** वज्रमृत्तिकामयः श्री**भरतेश्वर**पूजितो भुवनतिलकः श्रीआदिनाथः । **सोपारके** जीवन्त[6]स्वामिश्रीऋषभदेवप्रतिमा । **नगरमहास्थाने** श्रीभरतेश्वरकारितः श्रीयुगादिदेवः । **दक्षिणापथे गोमटदेवः** श्री**बाहुबलिः** । **उत्तरापथे कलिङ्गदेशे** गोमटः श्रीऋषभः । **खङ्गारगढे** श्री**उग्रसेन**पूजितो मेदिनीमुकुटः श्रीआदिनाथः । **महानगर्यां** उद्दण्डविहारे श्रीआदिनाथः । **पुरिमताले** श्रीआदिनाथः । **तक्षशिलायां** बाहुबलिविनिर्मितं धर्मचक्रम् । **मोक्षतीर्थे** श्रीआदिनाथपादुका । [7]**कोल्लपाक**पत्तने माणिक्यदेवः श्रीऋषभो मन्दोदरीदेवतावसरः । **गङ्गा-यमुनयो**र्वेणीसंगमे श्रीआदिकरमण्डलम् ।

२. श्री**अयोध्यायां** श्रीअजितस्वामी । **चंदेर्यां** अजितः । **तारणे** विश्वकोटिशिलायां श्रीअजितः । **अंगदिकायां** श्रीअजित-शांतिदेवताद्वयं श्रीब्रह्मेन्द्रदेवतावसरः ।

३. **श्रावस्त्यां** श्रीसंभवदेवो जाङ्गुलीविद्याधिपतिः ।

४. [8]**संगमती**ग्रामे श्रीअभिनन्दनदेवः । **नर्मदा** तत्पादेभ्यो निर्गता ।

५. **क्रौंचद्वीपे सिंहलद्वीपे हंसद्वीपे** श्रीसुमतिनाथदेवपादुकाः । [9]**आम्बुरिणि**ग्रामे श्रीसुमतिदेवः ।

६. **माहेन्द्रपर्वते कौशाम्ब्यां** च श्रीपद्मप्रभः ।

७. **मथुरायां** महालक्ष्मीनिर्मितः श्रीसुपार्श्वस्तूपः[10] । श्री**दशपुर**नगरे श्रीसुपार्श्वः सीतादेवी[11]देवतावसरः ।

८. **प्रभासे** शशिभूषणः श्रीचन्द्रप्रभश्चन्द्रकान्त[12]मणिमयः श्रीज्वालामालिनीदेवतावसरः । श्रीगौतमस्वामिप्रतिष्ठितो **वलभ्या**गतः श्रीनन्दिवर्धनकारितः श्रीचन्द्रप्रभः । **नासिक्यपुरे** श्रीजीवितस्वामी त्रिभुवनतिलकः श्रीचन्द्रप्रभः । **चन्द्रावत्यां** मन्दिरमुकुटः श्रीचन्द्रप्रभः । **वाराणस्यां** विश्वेश्वरमध्ये श्रीचन्द्रप्रभः ।

९. **कायाद्वारे** श्रीसुविधिनाथः ।

१०. **प्रयागतीर्थे** श्रीशीतलनाथः ।

११. **विन्ध्याद्रौ मलयगिरौ** च श्रीश्रेयांसः ।

१२. **चम्पायां** विश्वतिलकः श्रीवासुपूज्यः ।

१३. **काम्पील्ये** गङ्गामूले, श्री**सिंहपुरे** च श्रीविमलनाथः ।

१४. **मथुरायां** यमुनाह्रदे, समुद्रे **द्वारवत्यां, शाकपाणि**मध्ये श्रीअनन्तः ।

---

1 B वेद° । 2 Pa पूर्णकलशः । 3 B °स्थापित° । 4 Pa द्वितीयो । 5 Pa काशहृदे । 6 Pa जीवत° । 7 Pa-b कोलपाक°; B कोल्लापाक° । 8 Pa सग° । 9 Pa आमुरणि° । 10 Pa °स्तूभः । 11 Pa सीतादेवता° । 12 B Pb °कान्ति° ।

१५. **अयोध्या**समीपे **रत्नवाहपुरे** नागमहितः श्रीधर्मनाथः ।

१६. **किष्किन्धायां लंकायां पाताललंकायां**[1] **त्रिकूटगिरौ** श्रीशान्तिनाथः ।

१७-१८. **गङ्गा-यमुन**योर्वेणीसंगमे श्रीकुंथुनाथारनाथौ ।

१९. **श्रीपर्वते** मल्लिनाथः ।

5 २०. **भृगुपत्तने** अनर्घ्यरत्नचूडः श्रीमुनिसुव्रतः । **प्रतिष्ठानपुरे अयोध्यायां विन्ध्याचले माणिक्यदंडके** मुनिसुव्रतः ।

२१. **अयोध्यायां** मोक्षतीर्थे नमिः ।

२२. **शौर्यपुरे शङ्ख**जिनालये **पाटला**नगरे **मथुरायां द्वारकायां सिंहपुरे स्तम्भतीर्थे** पाताललिङ्गाभिधः श्रीनेमिनाथः ।

10 २३. **अजागृहे** नवनिधिः श्रीपार्श्वनाथः । **स्तंभनके** भवभयहरः । **फलवर्द्धिकायां** विश्वकल्पलताभिधः । **करहेटके** उपसर्गहरः । **अहिच्छत्रायां** त्रिभुवनभानुः । **कलिकुण्डे नागहृदे** च श्रीपार्श्वनाथः । **कुक्कुटेश्वरे** विश्वगजः । **माहेन्द्रपर्वते** छायापार्श्वनाथः । **ओंकारपर्वते** सहस्रफणी पार्श्वनाथः । **वाराणस्यां** दण्डखाते भव्यपुष्करावर्तकः । **महाकालान्तरा** पातालचक्रवर्ती । **मथुरायां** कल्पद्रुमः । **चम्पाया**मशोकः । **मलयगिरौ** श्रीपार्श्वः ।

15 २४. **श्रीपर्वते** घण्टाकर्णमहावीरः । **विन्ध्याद्रौ** श्रीगुप्तः[2] । **हिमाचले** छायापार्श्वो मन्त्राधिराजः श्रीस्फुलिङ्गः । **श्रीपुरे** अन्तरिक्षः श्रीपार्श्वः । [3]**डाकुली-भीमेश्वरे** श्रीपार्श्वनाथः । **भाइल**[4]**स्वामिगढे** देवाधिदेवः । **श्रीरामशयने** प्रद्योतकारि[5]श्रीवर्धमानः । **मोढेरे वायडे खेडे**[6] **नाणके पल्ल्यां मतुण्डके मुण्डस्थले श्रीमालपत्तने उपकेशपुरे कुण्डग्रामे सत्यपुरे टङ्कायां गङ्गाहृदे सरस्थाने वीतभये चम्पायां** [7]**अपापायां पुंड्रपर्वते नन्दिवर्द्धन-कोटिभूमौ** वीरः । **वैभाराद्रौ राजगृहे कैलासे श्रीरोहणाद्रौ** 20 श्रीमहावीरः ।

अष्टापदे चतुर्विंशतिस्तीर्थकराः । **संमेतशैले** विंशतिर्जिनाः । **हेमसरोवरे** द्वासप्ततिजिनालयः । **कोटिशिला** सिद्धि[8]क्षेत्रम् ।

इति जैनप्रसिद्धानां तीर्थानां नामपद्धतेः । सङ्ग्रहोऽयं स्फुटीचक्रे श्री**जिनप्रभ**सूरिणा ॥ १ ॥

*किञ्चिदत्र यथा दृष्टं किञ्चिच्चापि यथा श्रुतम् । स्वतीर्थनामधेयानां पद्धतौ लिखितं मया ॥ २ ॥

25 **॥ समाप्तस्तीर्थनामधेयसंग्रहकल्पः**† **॥**

॥ ग्रं० ४९, अ० २१ ॥

---

1 P विहाय नास्त्यन्यत्र । 2 B श्री गुप्तिः । 3 P व्याकुली°; Pc 'डाकुली चन्द्रावत्यां मंदिरमुकुटभीमेश्वरे' एतादृशः पाठः । 4 Pa भालय° । 5 P °कारितः । 6 B Pa नास्ति 'खेडे' । 7 Pa विहाय 'अपापायां' नास्ति । 8 P Pa सिद्ध° ।
* इदं पद्यं नास्ति P आदर्शे । † P इति सर्वचतुरशीतिमहातीर्थनामसङ्ग्रहकल्पः ।

४६. समवसरणरचनाकल्पः ।

नमिऊण जिणं वीरं कप्पं सिरिसमवसरणरयणाए । पुवायरिअकयाहिं गाहाहिं चेव जंपेमि ॥ १ ॥
वाऊ-मेहा कमसो जोअणभूसोहि[1]-सुरहिजलवुट्ठी । मणिरयणभूमिरयणं कुणंति पुण कुसुमवुट्ठि वणा ॥ २ ॥
पायारतिअं कमसो कुणंति वररुप्पकणयरयणमयं । कंचणवसुमणिकविसीससोहिअं[2] भवण-जोइ-वणा ॥ ३ ॥
गाउअमेगं छस्सयधणुहपरिच्छिन्नमंतरं तेसिं । अट्ठंगुलीकरयणी तित्तीसं धणुहबाहल्लं ॥ ४ ॥ 5
पंचसयधणुच्चत्तं चउदारविराइआण वप्पाणं । सवप्पमाणमेयं निअनिअहत्थेण य जिणाणं ॥ ५ ॥
सोवाणदससहस्सा भूमीओ गंतु पढमपायारो । पण्णासधणुहपयरो पुणो वि सोवाणपणसहसा ॥ ६ ॥
तत्थ विअ बीअवप्पो पुव्वुत्तविही तयंतरे नेया । तत्तो तईओ एवं वीससहस्सा य सोवाणा ॥ ७ ॥
दस पंच पंच सहसा सवे हत्थुच्च-हत्थवित्थिन्ना । बाहिर-मज्झ-ऽब्भिंतरवप्पाण कमेण सोवाणं ॥ ८ ॥
तम्मज्झे मणिवीढं भूमीओ सड्ढदुन्निकोसुच्चं । दोधणुसयवित्थिण्णं चउदारं जिणधणुसमुच्चं ॥ ९ ॥ 10
सिंहासणाइं चउरो मणिपडिछन्नाइं तेसु चउरूवो । पुवमुहो[3] ठाइ सयं छत्ततयभूसिओ भयवं ॥ १० ॥
समहिअजोअणपिहुलो तहा असोगो दुसोलसधणुच्चो । पडिबिंबत्तयपमुहं किच्चं तु कुणंति वंतरिआ ॥ ११ ॥
परिसाअग्गे आइसु मुणिवर-वेमाणिणीओं समणीओं । भवण-वण-जोइदेवी देवा वेमाणिअ-नरित्थी ॥ १२ ॥
जोअणसहस्सदंडो धम्मज्झओ कुडहिकेउसंकिन्नो । दो जक्ख चामरधरा जिणपुरओं धम्मचक्कं च ॥ १३ ॥
ऊसिअधय-मणितोरण-अडमंगल-पुण्णकलस-दामाइं । पंचालिअ-छत्ताइं पइदारं धूवघडिआओं ॥ १४ ॥ 15
हेम-सिअ-रत्त-सामलवण्णा सरवण य जोइ-भवणवई । पइदारं वसु वप्पे पुवाइसु[4] ठंति पडिहारा ॥ १५ ॥
जयविजयादिअ-अवराजिअगोरा रत्तकणयनीलाभा । देवी पुवकमेणं सकच्छरा[5] ठंति कणयमए ॥ १६ ॥
जडमउडमंडिआ तह तुंबरु-खट्टंग-पुरिससिरिमाली । बहिवप्पदार दोसु वि पासेसुं ठंति[6] पइवप्पं ॥ १७ ॥
बहिवप्पे जाणाइं बीए सत्तू वि मित्तभावगया । तिरिआ मणिमयछंदे[7] इंसु पुण रयणवप्पबहिं ॥ १८ ॥
बहिवप्पदारमज्झे दो दो वावीओं हुंति वट्टम्मि । चउरंससमोसरणे इग इग वावी उ कोणेसुं ॥ १९ ॥ 20
उक्किट्ठि[8] सीहनायं कलयलसद्देण सवओ सवं । तित्थयरपायमूले करिंति देवा निवयमाणा ॥ २० ॥
चेइदुम-पीढछंदग-आसण-छत्तं च चामराओ अ । जं चण्णं करणिज्जं करंति तं वाणमंतरिआ ॥ २१ ॥
साहारणओसरणे एवं [9]जत्थिड्ढिमंतु ओसरइ । इक्कु च्चिअ तं सवं करेइ भयणाउ इअरेसिं ॥ २२ ॥
[10]सूरुदयपच्छिमाए ओगाहंतीइ पुवओ एइ । दोहिं पउमेहिं पाया मग्गेण य हुंति सत्तन्ने ॥ २३ ॥
आदाहिणपुवमुहो तिदिसिं पडिरूवगाउ देवकया । जिट्ठगणी अन्नो वा दाहिणपुवे अ दूरंमि ॥ २४ ॥ 25
जे ते देवेहिं कया तिदिसिं पडिरूवगा जिणवरस्स । तेसिं पि तप्पभावा तयाणुरूवं हवइ रूवं[11] ॥ २५ ॥
इंतं महड्ढिअं पणिवयंति ठिअमवि [12]वयंति पणमंता । न वि जंतणा न विकहा न परुप्परमच्छरो न भयं ॥ २६ ॥
तित्थपणामं काउं कहेइ साहारणेण सद्देण । सवेसिं सन्नीणं जोअणनीहारिणा भयवं ॥ २७ ॥
जत्थ अपुवोसरणं अदिट्ठपुवं[13] च जेण समणेणं[14] । बारसहिं जोअणेहिं सो एइ अणागमो लहुआ ॥ २८ ॥
साहारणासवंते[15] तदुवओगो अगाहगगिराए । नय निविज्जइ[16] सोआ किढिवाणिअ-दासिआहरणा ॥ २९ ॥ 30
सवाउअं पि सोआ [17]झविज्ज जइ हु सययं जिणो कहइ । सीउह्व-खुप्पिवासापरिस्समभए अविगणंतो ॥ ३० ॥

---

1 C °सोहिया । 2 Pb °सोहियं च वणजोइ° । 3 B पुव्वमुहे । 4 C पव्वाइसु; Pb पुव्वाइंसु वाइसु । 5 B सत्थकरा । 6 C ठवंति । 7 Pb-c छंदे इंसे । 8 C उक्किट्ठ° । 9 Pa C जत्थिड्ढि°; Pb जत्थड्ढि° । 10 Pa सूरदय°; C सूरिदय° । 11 Pa रूवं । 12 Pa थयंति; C यंति । 13 Pa पुव्वंत; C पुव्वं व । 14 Pb सरणेणं । 15 C °सवंतो । 16 B नय-रिदिज्जइ । 17 C सोआमजझविजज्जइ ।

विसीओ सुवण्णस्साबारस अद्धं[1] च सयसहस्साइं । तावइअं चिअ कोडी पीईदाणं तु चक्किस्स ॥ ३१ ॥
एअं चेव पमाणं नवरं रययं तु केसवा दिंति । मंडलिआण सहस्सा पीईदाणं सयसहस्सा ॥ ३२ ॥
भत्तिविभवाणुरूवं अन्नेवि य दिंति इब्भमाईआ । सोऊण जिणागमणं निउत्तमणिओइएसुं वा ॥ ३३ ॥
रायावरायमच्चो तस्सासइ पवरजणवओ वावि । दुब्बलि खंडिअ बलि छडिअ तंदुलाणाढगं कलमा ॥ ३४ ॥
5 भाइअमुणाणिआणं अखंडफुडिआण[2] फलगसरिआणं । कीरइ बली सुरावि अ तत्थेव छुभंति गंधाई ॥ ३५ ॥
बलिपविसण[3]समकालं पुव्वद्दारेण ठाइ परिकहणा । तिगुणं पुरओ पाडण तस्सद्धं अवडिअं देवा ॥ ३६ ॥
अद्धद्धं अहिवइणो अवसेसं होइ पागयजणस्स । सव्वामयप्पसमणी[4] कुप्पइ नण्णो य छम्मासा ॥ ३७ ॥
राओवणीअसीहासणोवविट्ठो व पायपीढंमि । जिट्ठो अन्नयरो वा गणहारि करेइ बीआए[5] ॥ ३८ ॥
इअ समवसरणरयणाकप्पो सुत्ताणुसारओ लिहिओ । लेसुद्देसेण इमो **जिणपह**सूरिहिं पढियव्वो ॥ ३९ ॥

10 ॥ **इति समवसरणरचनाकल्पः** ॥

॥ ग्रं० ४३ । आदितः ३२०८ ॥

आदितः सर्वकल्पेषु ग्रन्थाग्रमिह जातवान् । अनुष्टुभामष्टयुता दशनप्रमिताः शताः ॥

श्री**धर्मघोष**सूरयोऽप्येवं समवसरणरचनास्तवमाहुः—"थुणिमो केवलिवत्थं० ।" ग्रं० २३, अ० १३ ॥

४७. कुडुंगेश्वरनाभेयदेवकल्पः ।

15 श्वेताम्बरेण चारणमुनिनाचार्येण **वज्रसेने**न ।
शक्रावतारतीर्थे श्री**नाभेयः** प्रतिष्ठितो जीयात् ॥ १ ॥

[6]**कुडुंगेश्वर**नाभेयदेवस्यानल्पतेजसः । कल्पं जल्पामि लेशेन दृष्ट्वा शासनपट्टिकाम् ॥ २ ॥

पूर्वं [7]**लाटदेशमण्डनभृगुकच्छ**पुरालङ्कारे **शकुनिकाविहारे** स्थिताः श्री**वृद्धवादि**सूरयो 'यो येन निर्जीयते तेन तस्य शिष्येण भाव्य'मिति प्रतिज्ञां विधाय वादकरणार्थं **दक्षिणापथा**यातं कर्णाट[8]भट्टदिवाकरं 20 निर्जित्य व्रतं ग्राहयां चक्रिरे । **सिद्धसेनदिवाकरे**त्यभिधयाऽभ्यधुः । ततः कतिचिद्दिनैर्निःशेषानप्यागमानध्यजीगपत् । अन्यदा तु सकलानप्यागमान् संस्कृतानहं करोमीति तेन वचनमिदमूचे । ततः पूज्या अपीदमभिदधिरे—किं संस्कृतं कर्तुं न जानन्ति श्रीमन्तस्तीर्थङ्करा गणधरा वा यदर्द्धमागधेनागमानकृषत । तदेवं जल्पतस्तव महत्प्रायश्चित्तमापन्नम् । किमेतत्तवाग्रतः कथ्यते । स्वयमेव जानन्नसि । ततो विमृश्याभिदधे—भो भगवन् ! आश्रितमौनो द्वादशवार्षिकं पाराञ्चितं नाम प्रायश्चित्तं गुप्तमुखवस्त्रिकारजोहरणादिलिङ्गः प्रकटितावधूतरूपश्चरिष्यामीत्यावश्यकम् । उपयुक्त इति गुरुभिरभिहित- 25 माकर्ण्य देशान्तरग्रामनगरादिषु पर्यटन् द्वादशे वर्षे श्रीम**दुज्जयिन्यां कुडुंगेश्वर**देवालये शेफालिकाकुसुमरंजिताम्बरालङ्कृतशरीरः समागत्यासांचक्रे । ततो देवं कस्मान्न नमस्यतीति लोकैर्जल्प्यमानोऽपि नाजल्पत् । एवं च[9] जनपरम्परया श्रुत्वा, सर्वत्रानृणीकृतविश्वविश्वंभराङ्कितनिजैकवत्सरः श्री**विक्रमादित्य**देवः समागत्य जल्पयांचकार—क्षीरलिलिक्षो भिक्षो[10] ! किमिति त्वया देवो न नमस्यते[11] ? । ततस्त्विदमवादि वादिना—मया नमस्कृते देवे लिङ्गभेदो भवतामप्रीतये भविष्यति । राज्ञोचे—भवति (°तु ?) क्रियतां नमस्कारः । तेनोक्तम्—श्रूयतां तर्हि । ततः पद्मासनेन भूत्वा 30 [12]द्वात्रिंशद्-द्वात्रिंशिकाभिर्देवं स्तोतुमुपचक्रमे । तथा हि—

1 C अद्धं । 2 Pa °फुडिआण । 3 Pa °पवसण° । 4 C °प्पसवणी । 5 B बीआ य । 6 P कुडंगेश्वर° । 7 Pa लब्राट° । 8 C °पट्ट° । 9 B नास्ति 'च' । 10 P नास्ति । 11 C देवो न मंस्यते; Pa न नमस्यते । 12 P B नास्ति 'द्वात्रिंशद्' ।

स्वयंभुवं भूतसहस्रनेत्रमनेकमेकाक्षरभावलिङ्गम् । अव्यक्तमव्याहतविश्वलोकमनादिमध्यान्तमपुण्यपापम् ॥ १ ॥

इत्यादि प्रथम एव[1] श्लोके प्रासादस्थितात् शिखिशिखाग्रादिव लिङ्गाद्धूमवर्तिरुदस्थात् । ततो जनैर्वचनमिदमूचे–अष्टविद्येशाधीशः कालाग्निरुद्रोऽयं भगवांस्तृतीयनेत्रानलेन भिक्षुं भस्मसात्करिष्यति । ततस्तडित्तेज इव सतडत्कारं प्रथमं ज्योतिर्निर्गत्याप्रतिचक्राताड्यमानमिथ्यादृष्टिदैवतमामूलाल्लिङ्गं द्विधा भित्त्वा प्रादुरास पद्मासनासीनः स्वयंभूर्भगवान्**नाभिसूनुः** । तदनया दर्शनप्रभावनया तीर्णः पाराञ्चिताम्भोनिधिरिति विमुच्य रक्ताम्बराणि, प्रकटीकृत्य मुखवस्त्रिका- 5
रजोहरणादिलिङ्गानि, महाराजं धर्मलाभाक्षरैराशीर्वादयांचक्रे वादीन्द्रः । ततो विनयपुरस्सरम्–

सूरये **सिद्धसेनाय** दूरादुच्छ्रितपाणये । धर्मलाभ इति प्रोक्ते ददौ कोटिं नराधिपः ॥ १ ॥

ततः प्रभून् क्षमयित्वा नृपतिः स्तुतिमकार्षीत् । यथा–

उद्व्यूढपाराञ्चित**सिद्धसेनदिवाकरा**चार्यकृतप्रतिष्ठः ।
श्रीमान् **कुडुंगेश्वरनाभिसूनु**र्देवः शिवायास्तु जिनेश्वरो वः ॥ १ ॥ 10

ततो भगवतो भट्टश्रीदिवाकरसूरेर्देशनया [2]संजीविनीचारिचरकन्यायेन स्वाभाविकभद्रकतया विशेषतः सम्यक्त्वमूलां देशविरतिं प्रत्यपादि श्री**विक्रमादित्यः** । ततश्च **गोहृद**मण्डले च **सांबद्रा**[3] प्रभृतिग्रामाणामेकनवतिं, **चित्रकूट**मण्डले **वसाड**प्रभृतिग्रामाणां †चतुरशीतिं, तथा [4]**घुंटारसी**प्रभृतिग्रामाणां चतुर्विंशतिं, **मोहडवासक**मण्डले **ईसरोडा**प्रभृतिग्रामाणां† षट्पञ्चाशतं श्री**कुडुंगेश्वरऋषभदेवाय** शासनेन स्वनिःश्रेयसार्थमदात् । ततः शासनपट्टिकां 'श्रीम**दुज्जयिन्यां**, संवत् १, चैत्रसुदि १, गुरौ, [5]भाटदेशीयमहाक्षपटलिकपरमार्हतश्वेताम्बरोपासकब्राह्मण- 15
गौतमसुत**कात्यायन**ेन राजाऽलेखयत् ।' ततः श्री**कुडुंगेश्वर**ऋषभदेवप्रकटीभवनदिनात् प्रभृति सर्वात्मना मिथ्यात्वोच्छेदेन सर्वानपि जटाधरादीन् दर्शनिनः श्वेताम्बरान् कारयित्वा परिमुक्तमिथ्यादृष्टिदेवगुरुः सकलामप्यवनीं जैनमुद्राङ्कितां चकार । ततः परितुष्टैः श्री**सिद्धसेन**सूरिरभिदधे वसुधाधवः ।

पुण्णे वाससहस्से सयंमि अहिअंमि नवनवइकलिए । होही **कुमरनरिंदो** तुह **विक्कम**राय ! सारिच्छो ॥ १ ॥

इत्थं ख्यातिं सर्वजगत्पूज्यतां चोपगतः श्री**कुडुंगेश्वर**युगादिदेव इति । 20

कुडुंगेश्वरदेवस्य कल्पमेतं यथाश्रुतम् । रुचिरं रचयां चक्रुः श्री**जिनप्रभ**सूरयः ॥ १ ॥

॥ इति कुडुंगेश्वरयुगादिदेवकल्पः ॥

॥ ग्रं० ५५, अ० १८ ॥

---

1 C नास्ति 'एव' । 2 B P संजीवनी° । 3 B साबद्रा; P सावद्रा । † एतदन्तर्गता पंक्तिः नास्ति P आदर्शे । 4 C घंटारसी । 5 B C भाद° ।

४८. व्याघ्रीकल्पः ।

यः स्यादाराधको जन्तुः श्रेयस्तत्कीर्तनाद् ध्रुवम् । इत्यालोच्य हृदा किंचिद्व्याघ्रीकल्पं वदाम्यहम् ॥ १ ॥
श्री**शत्रुञ्जय**नाभेयचैत्यवप्रस्य कर्हिचित् । प्रतोलीद्वारमावृत्य काचिद्व्याघ्री समास्थिता ॥ २ ॥
निरीक्ष्य निश्चलाङ्गीं तामातङ्कातुरमानसाः । जनाः श्राद्धा जिनं नन्तुं बहिस्तो न डुढौकिरे ॥ ३ ॥
5 राजन्यः साहसी कोऽपि तस्याः पार्श्वमुपासृपत् । सा तु तं प्रति नाकार्षीत् हिंसाचेष्टां मनागपि ॥ ४ ॥
विश्वस्य बाहुजस्तस्य कुतोऽप्यानीय तत्पुरः । आमिषं मुमुचे सा च दृशापि न तदस्पृशत् ॥ ५ ॥
अथ श्राद्धजनोऽप्येत्य त्यक्तभीस्तत्पुरः क्रमात् । तरसा सरसं भक्ष्यं[1] पानीयं चोपनीतवान् ॥ ६ ॥
तदप्यनिच्छन्तीं दृष्ट्वा तां दध्यौ जनता हृदि । नूनं जातिस्मरैषाऽत्र तीर्थेऽनशनमाददे ॥ ७ ॥
श्लाघ्यस्तिर्यग्भवोऽप्यस्याश्चतुर्धाऽऽहारमुक्तितः । एकाग्रचक्षुषा चैषा देवमेव निरीक्ष्यते[2] ॥ ८ ॥
10 अभ्यर्च्य[3] गन्धपुष्पाद्यैः श्राद्धाः साधर्मिकीधिया । सम्भावयां बभूवुस्तां स्फीतसङ्गीतकोत्सवैः ॥ ९ ॥
निराकारं प्रत्याख्यातं तेऽथ[4] तस्या अचीकरन् । मनसैव श्रद्दधाना सा स्वीचक्रे च तन्मुदा ॥ १० ॥
इत्थं सा तीर्थमाहात्म्यात्समृद्ध्यच्छुद्धवासना । दिनानुपोष्य सप्ताष्टान्नष्टपापा ययौ दिवम् ॥ ११ ॥
चन्दनागरुभिस्तस्या वपुः संस्कार्य संज्ञिनः । मतोऽस्या दक्षिणे पक्षे शैलीं मूर्तिं न्यवीविशन् ॥ १२ ॥
तीर्थचूडामणिर्जीयात्सैष श्री**विमलाचलः** । भवेयुर्यत्र तिर्यञ्चोऽप्येवमाराधिकाग्रिमाः ॥ १३ ॥
15 व्याघ्रीकल्पमिमं कृत्वा श्री**जिनप्रभ**सूरयः । पुण्यं यदार्जयंस्तेन श्रीसङ्घोऽस्तु सुखास्पदम् ॥ १४ ॥

॥ इति व्याघ्रीकल्पः ॥

॥ ग्रं० १४ ॥

---

1 B C भक्ष्यं । 2 C निरीक्षते । 3 B अभ्यर्च्य । 4 B ते च; C तथा ।

४९. अष्टापदगिरिकल्पः ।

अट्ठावयदेहपहं भवकरिअट्ठावयं नमिय **उसहं** । **अट्ठावयस्स** गिरिणो जंपेमि समासओ कप्पं ॥ १ ॥

अत्थि इहेव **जंबुद्दीवे** दीवे **भारहे** वासे दक्षि(°क्खि)णभरहद्धमज्झे नवजोअणवित्थिन्ना बारसजोअण-दीहा **अउज्झा** नाम नयरी । सा य सिरि**उसभ-अजिअ-अभिनंदण-सुमइ-अणंताइ** जिणाणं जम्मभूमी । तीसे अ उत्तरदिसाभाए[1] बारसजोअणेसुं **अट्ठावओ** नाम **केलासा**पराभिहाणो रम्मो[2] नगवरो अट्ठजोअणुच्चो सच्छ- 5 फालिहसिलामओ, इत्तुच्चिअ लोगे **धवलगिरि**त्ति पसिद्धो । अज्जावि **अउज्झा**परिसरवत्तिउड्डयकूडोवरि[3] ठिएहिं निम्मले नहयले धवला सिहरपरंपरा तस्स दीसइ । सो पुण महासरोवरघण[4]सरसपायवनिज्झरवारिपूरकलिओ परिपाससं-चरंतजलहरो मत्तमोराइविहगकुलकलयलमुहलो किंनरखेअररमणीरमणिज्जो चेइअवंदणत्थमागच्छंतचारणसमणाइलोगो आलोअमित्तेणं पि खुहापिवासावहरणो आसन्नवत्तिमाणससरोवरविराइओ अ । एअस्स उवच्चयासुं **साकेअ**वासिणो जणा नाणाविहकीलाहिं कीलंति म्ह । तस्सेव य सिहरे **उसभ**सामी चउदसमभत्तेणं पज्जंकासणट्ठिओ अणगाराणं 10 दसहिं सहस्सेहिं समं माहबहुलतेरसीए अभीइरिक्खे पुव्वण्हे निव्वाणमणुपत्तो । तत्थ सामिणो देहं सक्कारियं सक्काइएहिं । पुव्वदिसाए सामिणो चिया, दक्खिणदिसाए इक्खागुवंसीणं, पच्छिमदिसाए सेससाहूणं । तम्मि चियाठाणतिगे देवेहिं थूभतिगं कयं । **भरह**चक्कवट्टिणा य सामिसक्कारासन्नभूयले जोअणायामो तदद्धपिहुलो तिगाउअसमूसिओ सिंहनिसिज्जा नामधिज्जो पासाओ रयणोवलेहिं वड्डइरयणेण कारिओ । तस्स चत्तारि दुवाराणि फालिहमयाणि । पइदारं उभओ पासेसुं सोलस रयणचंदणकलसा । पइदारं सोलस रयणमया तोरणा । दारे दारे सोलस अट्ठमंगलाइं । तेसु दुवारेसु चत्तारि 15 विसाला मुहमंडवा । तेसिं मुहमंडवाणं पुरओ चत्तारि पेक्खामंडवा । तेसिं पेक्खामंडवाणं मज्झभागेसु वइरामया अक्खवाडा । अक्खाडे अक्खाडे मज्झभागे रयणसिंहासणं । पत्तेअं [5]पेक्खामंडवग्गे मणिपीढिआओ । तदुवरि रयणमया चेइअथूभा । तेसिं चेइअथूभाणं पुरओ पत्तेअं पइदिसं महइमहालिआ मणिपीढिआ । तदुवरि पत्तेअं चेइअपायवा । पंचसयधणुप्पमाणाओ चेइयथूभसंमुहीओ सव्वंगरयणनिम्मिआ †**उसभा वद्धमाणा चंदाणणा वारिसेणा** नामिगाओ† पलिअंकासणनिसण्णाओ मणोहराओ सासयजिणपडिमाओ **नंदीसर**दीवचेइअमज्झे व हुत्था । तेसिं च 20 चेइअथूभाणं पुरओ पत्तेअं चेइअपायवा । तेसिं चेइअपायवाणं पुरओ पत्तेअं मणिपीढिआओ; तासिं च उवरि पत्तेअं इंदज्झओ । इंदज्झयाणं पुरओ पत्तेअं नंदापुक्खरिणी त्ति सोवाणा सतोरणा सच्छसीअलजला पुण्णा विचित्त-कमलसालिणी मणोहरा [6]दहिमुहाधारपुक्खरिणीनिभा । सीहनिसिज्जामहाचेइअमज्झभागे महइमहालिआ मणिपी-ढिआ । तीए उवरि चित्तरयणमओ देवच्छंदओ । तदुवरि नाणावण्णंसुगमओ उल्लोओ । उल्लोअस्स अंतरे [7]पासओ अ वइरामया अंकुसा । तेसु अंकुसेसु ओलंबिया कुंभमिज्जआमलगथूलमुत्ताहलमया हारा । हारपंतेसु अ विमलाओ 25 मणिमालिआओ । *मणिमालिआणं पंतेसु वइरमालिआओ* । चेइअभित्तीसु विचित्तमणिमया गवक्खा डज्झमाणागरु-धूमसमूहवमालिआ । तम्मि देवच्छंदे रयणमईओ उसभाइचउवीसजिणपडिमाओ निअनिअसंठाण-माण-वण्णधराओ ‡कारियाओ **भरह**चक्किणा । तत्थ सोलस पडिमाओ‡—**उसभ-अजिअ-संभव-अभिनंदण-सुमइ-सुपास-सीअल-सिज्जंस-विमल-अणंत-धम्म-संति-कुंथु-अर-नमि-महावीराणं** सुवण्णमईओ । **मुणिसु-व्वय-नेमीणं** रायावट्टमईओ । **चंदप्पह-सुविहीणं** फलिहमईओ । **मल्लि-पासनाहाणं** वेरुलिअमईओ । 30 **पउमप्पह-वासुपुज्जाणं** पउमरायमईओ । तासिं च सव्वासिं पडिमाणं लोहिअक्खपडिसेगा, अंकरयणमया नहा । पडिसेगो नाम नहपज्जंतेसु जावयरसु व्व लोहिअक्खमणिरससेगो जं दिज्जइ । नाही-केसंतभूमी-जीहा-तालु-सिरीवच्छ-चूचु-

---

1 P भागे । 2 P आदर्शे एवैतत्पदम् । 3 Pa B उड्डयज्झाडोवरि । 4 'घण' नास्ति P । 5 B P पिक्खा° ।
† P उसभवद्धमाण-चंदाणण-वारिसेणनामिगाओ । 6 P दिहि० । 7 P पासाओ । * एतदन्तर्गतं वाक्यं नोपलभ्यते Pa आदर्शे ।
‡ एतदन्तर्गता पंक्तिः P आदर्शे एव प्राप्यते ।

ग-हत्थ-पायतलानि[1] तवणिज्जमयाणि । नयणपम्हाणि, कणीणिगाओ, मंसू, भमुहाओ, रोमाणि, सिरकेसा रिट्ठरयणमया । उट्ठा विहुममया । फालिहमया दंता । वयरमईओ सीसघडीओ । अंतो लोहिअक्खपडिसेगाओ, सुवण्णमईओ नासिआओ । लोहिअक्खपडिसेगपंताइं अंकमयाइं लोअणाइं । तासिं च पडिमाणं पिट्ठे पत्तेअं इक्किका रयणमई मुत्ता-पवाल-जाल-कं स-कोरण्ट-मल्लदामं फालिहमणिदंडं सिआयवत्तं धारिंती छत्तहरपडिमा । तासिं च उभयपासे पत्तेअं उक्खित्तमणिचाम-
5 राओ रयणमईओ चमरधारपडिमाओ । पडिमाणं च अग्गे पत्तेअं दो दो नागपडिमाओ, *दो दो जक्खपडिमाओ, दो दो भूअपडिमाओ,* दो दो कुंडधारपडिमाओ कयंजलीओ रयणमईओ सव्वंगुज्जलाओ पज्जुवासिंति । तहा देवच्छंदे चउवीसं रयणघंटाओ, चउवीसं माणिक्कदप्पणा, तहेव ठाणट्ठिअदीविआओ सुवण्णमईओ; तहा रयणकरंडगाइं, पुप्फचंगे- रिआओ, लोमहत्थाइं, पडलीओ, आभरणकरंडगाइं, कणगमयाणि, धूवदहणाणि, आरत्तिआणि, रयणमंगलदीवा, रय- णभिंगारा, रयणत्थालाणि, तवणिज्जपडिग्गहा, रयणचंदणकलसा, रयणसिंहासणाणि, रयणमयाणि अट्ठमंगलाणि, सुवण्णमया
10 तिल्लसमुग्गया, कणगमयाणि धूवभंडाणि, सुवण्णमया उप्पलहत्थगा । एअं सव्वं पत्तेअं पडिमाणं पुरओ हुत्था । तं चेइअं चंदकंतसालसोहिअं, ईहामिग-उसभ-मगर-तुरंगम-नर-किंनर-विहग-वालग-रुरु-सरभ-चमर-गय-वणलयाविचित्तं रयणथं- भसमाउलं, पडागारमणिज्जं, कंचणधयदंडमंडिअं, ओअट्ठिअकिंकिणीसद्दमुहलं, उवरि पउमरायकलसविराइअं, गोसीस- चंदणरसघासय (?) लंछिअं । माणिक्कसालभंजिआहिं विचित्तचिट्ठाहिं अहिट्ठिअनिअंबं, बारदेसमुभयओ चंदणरसलि- त्तकलसजुअलंकिअं, तिरियं बद्धोलंबिअधूवियसुरहिदामरम्मं, पंचवण्णकुसुमरइयघरतलं, कप्पूरागरुमिगमयधूवधूमं-
